प्रीति:

जीत सिंह खोखर



प्रीतिः

प्रीतिः

जीत सिंहः 'खोखरः'

पैप्सू बुक डिपो, पटियाला

भाषा विभाग, पंजाब सरकार

के सहयोग से प्रकाशित

प्रथम संस्करण 1986

मुख्य पृष्ठ :— अमरजीत सिंह 'सुखी'

प्रकाशक :— पैप्सू बुक डिपो, पटियाला (पंजाब)

☎ 72067

मुद्रक :— कंदोई प्रिंटरज़, नाभा-147201

PREETI (A Sanskrit Novel) By : Jit Singh 'Khokhar'

मूल्यम् :— 15-00

★ निवेदना ★

संस्कृत भाषा देव भाषा, सकल भाषासु प्राचीनतमा च विद्यते । अस्यामेव अस्माकं धर्मः, अस्माकं समाजः, अस्माकं संस्कृतिः, अस्माकमितिहासः, अस्माकं जीवनं भूतं भविष्य च सकलं सुसन्निहितं वर्तते । संस्कृत-गद्य-साहित्यं जनोपदेश - जनने अत्यन्तं शिक्षाप्रदमतिप्राचीनतमं च वर्तते । अस्मिन् साहित्ये उपन्यासस्य परम्परा न नवीना । शिवराज विजयम्, चन्द्रमौलिः, सेतुयात्रावर्णनम्, भारतानुवर्णनम्, इत्यादयः उपन्यासाः अस्य सुदृढानि प्रमाणानि सन्ति ।

'प्रीतिः' इति उपन्यासस्य रचना भारतीयानां जीवनं, संस्कृतिं, तेषां कर्त्तव्यं च लक्ष्यीकृत्य कृता। अस्योपन्यासस्य मुख्योद्देश्योऽस्ति :—"नारी सबला न तु अबला ।" पाठकानां रुचिमभिलक्ष्य भाषा सरलतमा एव प्रयुक्ता ।

अत्राहं संस्कृत - महाविद्यालय - नाभायाः प्राध्यापकेभ्यः परमश्रद्धेय श्री सत्यप्रसाद-ओम् प्रकाश - देवराज - महाभागेभ्यः शतशः धन्यवादान् वितरामि येषां मयि महती कृपा विद्यते । परमश्रद्धेयानां, श्री शालिग - राम - शुकदेव शर्मा - अजमेर सिंह-महोदयानां कृते अहं नतमस्तकोऽस्मि, येषाम्, आशीर्वचनानि मे प्रेरणा -दायकानि सन्ति ।

अन्ततो भाषा -विभाग -पञ्जाब-पटियाला-अधिकारिणां कृतज्ञोऽस्मि यैः पुस्तकस्य प्रकाशनाय अनुदानं स्वीकृतम् ।

अस्मिन् उपन्यासे जाताः अशुद्धीः* कृपयात्र स्वयमेव मार्जयन्तु विद्वांसः ।

राजकीय-संस्कृत-महाविद्यालयः
नाभा-147201-(पंजाब)

संस्कृत-विदुषामनुचरः
जीतसिंहः 'खोखरः'

---

*अन्ते शुद्धि-पत्रमपि विद्यते ।

समर्पणम्

"प्रेरणादायिकायै स्वर्गीया-धर्मभार्यायै,
परमजीतकौराभिधेयायै खोखरायै ।"

सा नो मन्द्रेषमूर्जं दुहाना धेनुर्वागस्मानुपसुष्टुतैतु ।

— ऋक् ॥

अस्मिन्नेव उपन्यासे

गतः कालो नायाति । यः कालस्य मूल्यं न जानाति तस्य कालोऽपि मूल्यं न जानाति । ईदृशः पुरुषो जीवने सफलतां प्राप्तुं न शक्नोति ॥

✲✲✲

तस्य जीवने जीविकायाः अनेके अवसरा आगताः परञ्च अधुना तु तेन प्रतिज्ञा कृता यत् स स्वमातुः इच्छां पूर्णं करिष्यति ।

✲✲✲

हृदयं तु समुद्रात् गम्भीरः को जानीयात् हृदयस्य वार्ताम् ।

✲✲✲

प्रीतिः अवदत्-"यत् संतोषः आवयोराक्षेपं प्रधानाचार्य-समीपे न कुर्यात् यत् एते बालिके मम अवक्षोभनं कुरुतः स्म ।

✲✲✲

परञ्च अहं स्व स्नेहस्य शपथं करोमि, यदि 'प्रथमः' इति निर्दिष्टो नाऽभवम् तर्हि स्नेहम्, स्नेहं न ज्ञास्यामि ।

✲✲✲

गच्छ, गच्छ, तव सदृशाः अनेके बलशाः मया दृष्टा ।

✲✲✲

यत् अस्माकं समाजः, एवं कर्तुम् आज्ञां न ददाति । द्वौ हृदयौ एकं द्रष्टुं न शक्नोति । दुःखानि श्रुत्वा उपहासं करोति ।

✲✲✲

क्रमशः

ये प्रेम वन्धने बद्धाः, ते न भयं कुर्वन्ति। ते मृत्तिका-घटेन सह समुद्रं तरन्ति।

* * *

यदा स जीविका लप्स्यते तदैव विवाहं भविष्यति, अन्यथा न।

* * *

यस्य ईश्वरः सहायकः स्यात् तस्य कोऽपि अशुभं कर्तुं न शक्नोति। प्रधानाचार्योऽवदत्—"न कापि चिन्ता। यतः मम महाविद्यालयस्य छात्रसंघः छात्र-हितार्थं कार्यं करोति, कार्यावरोधनं च न।"

* * *

हुकम-सिंहः बी.ए. प्रथम-भागे एव आसीत् परञ्च बालिका-पादुकानां प्रहार-सहने एम.ए. परीक्षा उत्तीर्णा कृता आसीत्। यतः कुलीन-वर्गस्य छात्राणां एषा अभिरुचिः वर्तते।

* * *

उत्कोच-लोभाद् त्वं मम आत्मानं कलंकितं कृतवान्। अहं स्वीकारं न करिष्यामि। मम गृहात् अपसर।

* * *

पुत्र! यदि त्वं प्रथम आगतोऽसि अहमपि निज अभियोगे प्रथमा आगता अस्मि।

आशीर्वचनानि

प्राचीना श्रमणाम् इव
नगराद् बहिः कियद्दूरम्
मन्दिरे एकस्मिन् गंगायाः
एकस्तपस्वी छात्रः
स्वकीये एकान्त-प्रकोष्ठे
प्राचीन-समयस्य
वेदपाठी छात्र इव
भूम्यासने स्थितः
स्व-स्वाध्याये
तल्लीनः निवसति स्म।

मठस्य अध्यक्ष-हेतुना
यदापि दिवसे
छात्रमिमं प्रति
भावाः समायान्ति।

तदा अन्तराद् बलादेव
साधुवादं स्यात्
वर्धापनं भवतु
इत्येवम् आशीर्वचनानि
बहिरागच्छन्ति।

यदा कदाचित्
कस्मैश्चित् कार्याय
उक्ते सति
अवलोकितो मया
अयम्, अतीव प्रसीदति
मे कार्यं कृत्वा
मे आदेशं मत्वा।

तदा सोऽपि दिवसः समायातः
यदा स्वाध्यायं परिसमाप्य
गुरुजनानाम् आशीर्वादैः
लब्धस्वर्णपदक सम्बभूव ।

परिणामतस्तत्रैव विद्यालये
पारितोषिकेन प्रतिफलेन
वरदेन शिवेन
अध्यापक-पदे नियोजितः ।

तदा अन्तराद् बलादेव
साधुवादं स्यात्
वर्धापनं भवतु
इत्येवम् आशीर्वचनानि
बहिरागच्छन्ति ।

लग्नशीलश्छात्र इव
प्राप्तायामपि आजीविकायाम्
स्व-स्वाध्यायं प्रति
सर्वदा जागरुकोऽयं स्थितः ।

विविधासु परीक्षासु
साफल्यम् अवाप्यापि
डाक्ट्रेट-पदवीमवाप ।

मध्ये मध्ये लेखनं प्रक्रिया
सततं प्रचलिता समवर्तत ।

विविध-पत्र-पत्रिकासु
पंजाबी-हिन्दी-संस्कृतस्य
रचनाजातानि यदा
प्रकाशताम् आयान्ति
समाजस्य जनमानसम्
आलोडयन्ति, आवर्जयन्ति ।

तदा, अन्तराद् बलादेव
साधुवादं स्यात्
वर्धापनं भवतु
इत्येवम् आशोर्वचनानि
बहिरागच्छन्ति।

अलं तावत्
प्रिय-वत्सलाय अस्मै
इदमेव वक्तुकामोऽस्मि
यदसौ,
अस्मिन् लेखन-क्षेत्रे
सदा, सर्वदा, सततं
वर्धमानः तिष्ठतु
स्वजीवने, अस्य
सर्वा अपि रचनाः
संस्कृत साहित्यस्य
निधयः समवर्तेरन्।

मे, अन्तराद् अन्ते
बलादेव
साधुवादं स्यात्
वर्धापनं भवतु
इत्येवम्
आशीर्वचनानि
बहिरागच्छन्ति ।

—0—

शालिग्रामः 'राज्यज्योतिर्विद्'
ज्योतिषाचार्यः
कुंगरा गली
समीप-साधुराम धर्मशाला
नाभा। (पटियाला, पंजाब)

स जातो येन जातेन, याति वंशः समुन्नतिम् ।
परिवर्तिनि संसारे, मृतः को वा न जायते ?

अस्ति पंजाब प्रान्तान्तर्वर्तिनि भटिण्डा मण्डलमध्ये रामपुराफूलं नाम उपमण्डलम् । तद् मध्ये भाईरुपा नामको महाग्रामः । तत्र शुद्धाचार– विवेकवतां अकालपुरुषसेविनां परमदेशभक्तानां श्रीचननसिहमहोदयानां भार्या परम धीमती नम्रा सुशीला दयालर्मातृ हृदया च श्रीमती प्रसन्न कौर महाभागा 1955 तमे जनवरी मासे (माघे मासे) सुतोत्तमानां पञ्चानां मध्ये प्रियं जीतसिंह नामानं पुत्ररत्नं प्रसूय परमं गौरवं समवाप ।

दशम कक्षा पर्यन्तं स्थानीये सर्वकारीये हाई स्कूले एवायं खोखरो महानुभावः शिक्षामधिजगाम ।

ततः उच्चशिक्षा प्राप्तये भारतीय - विचारानुसारं पितृपादैः प्रेरितः खोखरः खन्ना नगरं जगाम । तत्र संस्कृत-कालेजे प्राज्ञ–परीक्षां समुत्तीर्य नाभास्थ सर्वकारीय संस्कृत महाविद्यालये विधिवत् प्रविश्य विशारद-शास्त्रि-परीक्षाः त्रिभिरेव वर्षैः समुदतरत् तासु च सर्वोत्तमं स्थानं प्राप्य पित्रोः संस्थायाः प्रदेशस्य च नाम गौरवान्वितमकरोत् स्वर्णपदक-द्वयं चाध्यगच्छत् ।

ओ. टी. परीक्षां पारेगत्वा सर्वकारीय संस्कृत महाविद्यालये एव स्वस्य महिम्ना गुणैश्च सर्वकारीय सेवायां नियुक्तोऽभूत् ।

एष मे प्रियः छात्रः योग्यश्च सहयोगी संस्था-कर्मसु यथा सम्भवं अधिकाधिकं भागं स्वयं गृह्णाति ।

अत एव आचार्येषु छात्रेषु चायं प्रियः। सुन्दरः सुप्रकृतिश्चायं आचार्यः शतं जीव्यात्। लेखन कर्मणि च इतोऽपि अधिकां उन्नतिं कुर्यात् इति मे हार्दिको भावः। एनेन प्रियशिष्येन सहयोगिनाचार्येण च गौरवमावहति शुकः। अन्ते च केवलमिदं भूयोभूयः प्रार्थयते भगवन्तं भूतनाथम्:—

जीव्याज्जीतः शतं समाः,
नीरोगः सुखमश्नुयात्।
धर्मे धीर्धीयतां तातः,
सफलां श्रियमवाप्नुयात्॥

शुभाशंसनः

शुकदेव शर्मा
प्रधानाचार्यः
राजकीय-संस्कृत-महाविद्यालयः
नाभा—147201
पटियाला (पंजाब)

भूमिका

संस्कृत गद्यस्य परम्परा अतीव-प्राचीना। कृष्णयजुर्वेदे, अथर्ववेदे, ब्राह्मणसाहित्ये, उपनिषत्साहित्ये च गद्यस्य स्वरूपं प्राप्यते। स्वरूपोऽयं वैदिककर्मकाण्डस्य व्याख्यायां परिलक्षितो भवति। वेदांगसाहित्यस्य गद्ये समासात्मिकायाः सूत्रशैल्या दर्शनं भवति। पाणिनेस्तु सूत्रेषु घटमध्ये सागर एव भरितवान्। यास्काचार्यस्य निरुक्तम्, पाणिनेः अष्टाध्यायी, भारतीय-दर्शनानि च सूत्रात्मकगद्यस्य निदर्शनानि। इयमेव व्याख्यात्मिका सूत्रात्मिका च गद्यशैली भावी-संस्कृत-गद्य विकासस्य पीठिकां प्रस्तौति। एतद् — द्विरुप — प्रवृत्ति — कारणात् शैलोदृशा संस्कृतगद्यसाहित्यम् 'अलंकृतरूपेण अनलंकृतरूपेण च विभक्तम्।

मानवहृदयस्य विभिन्न-संवेदनानां प्रकाशने पद्यस्य अपेक्षया गद्यमतीव सामर्थ्यं वहति। संस्कृत-गद्यमपि विभिन्न-भाव भूमीः व्याख्यातुं सक्षमं वर्तते। अस्मिन् गद्ये कोमल-दुरुह-भावानां सफला अभिव्यक्तिः द्रष्टुं शक्यते।

अभिव्यक्ति-सक्षमता अस्य गद्यस्य प्रथमा महत्त्वपूर्णा च विशेषता। अस्य द्वितीया विशेषता लाघवता या हि समासकारणात् सन्धिकारणात् च आगता। ओजगुण-समन्विता अस्य तृतीया विशेषता अनेन हेतुना एव भाषा, भावाश्च नूतन सौन्दर्येण आवेष्टिता भवन्ति, भावग्राहिताया गाढबन्धतायाश्च सृष्टिर्जायते। अर्थगम्भीरता अस्य चतुर्थ-विशेषता। जटिल-दार्शनिक- समस्यानां निरूपणे, व्याकरणस्य शास्त्रीय-विवेचने इयं विशेषता विशिष्टरूपेण दृष्टिगोचरा अस्ति। अलंकार-प्रचुरता अस्य पञ्चम-विशेषता। परिष्कृत - परिनिष्ठित - सूत्रात्मक-

कारणात् संस्कृतगद्यम्, अलंकारैरलंकृतं वर्तते । विश्वस्य कस्यामपि भाषाया इयम् अलंकरण-प्रियता इयत्प्रचुररूपेण नावलोक्यते । पदलालित्यता अस्य षष्ठ- विशेषता । अस्य कोमलकान्त पदावली पाठकस्य हृदयवीणां झंकृतं करोति, कुत्रचित् च कठोर-पद-विन्यासः पाठकम् आवर्जयति ।

एता विशेषताः क्रमशः संस्कृतगद्यसाहित्यस्य मूर्धन्यानां सुबन्धु - बाण - दण्डीनां गद्येषु दृश्यन्ते । निष्कर्षरूपेण संस्कृत साहित्यं विविध-विशेषताभिः मण्डितं वर्तते ।

सुबन्धोः, बाणभट्टस्य, दण्डिनश्च कालः संस्कृतगद्यस्य विकासकाल आसीत् । एभिः संस्कृतगद्यम् अधिकरूपेण गौरवान्वितं जातम् । एषां त्रयाणां कालः संस्कृत गद्य साहित्यस्य स्वर्णिमः कालः समवर्तत ।

एतेषां पश्चात् दश-शताब्धो न जाने कदा कालकवलिता जाताः । गद्य साहित्यस्य शुद्धस्वरूपम् एतासु शताब्दीषु लुप्त दशायामेव आसीत् । तदनन्तरं 1858—1900 मध्ये एको महान् गद्यकारः संस्कृत आकाशे सूर्य इव अदोव्यत् । स च आसीत् स्वनामधन्यः, अम्बिकादत्तव्यासः । यस्य शिवराजविजय-नामकः, उपन्यासः, अद्यावधि संस्कृत-प्रणयीनां विदुषां कृते नितरां रुचिकरो वर्तते । अस्य गद्यलेखकस्य पश्चात् पण्डितप्रवरः ऋषीकेश-भट्टाचार्यः (1950—1961), पण्डितराजः क्षमारावः, वरदाचार्यश्च (1890—1954) विशिष्ट-रूपेण उल्लेखनीयाः सन्ति । अनन्तरं बंगलौर नगरस्य टी. राजम्मायाः "चन्द्रमौलिः" श्री नारायण शास्त्रि रिव्रस्ते महोदयस्य "विद्वच्चरित्रपञ्चकम्" श्री कृष्णमाचार्यस्य "रघुवंशविमर्शः" टी. के. गणपतिशास्त्रि-महोदयस्य सेतुयात्रावर्णनम्', पं. रामावतार-शर्मणः "भारतानु-

वर्णनम्'', अथ च द्विजेन्द्रनाथशास्त्रिण: संस्कृतगद्य विमर्श:" संस्कृत गद्य साहित्यस्य अप्रतिमा रचना: सन्ति । याभि: रचनाभिरियं विंशतिका शताब्दी अलंकृता तिष्ठति।

संस्कृतगद्यस्य विकासे आधुनिक संस्कृत निबन्धकाराणां योगदानमतीव महत्त्वपूर्णं वर्तते । एषु कतिपय - विशिष्ट-निबन्धकारा एते सन्ति-डा. मङ्गलदेव शास्त्री, डा. रामजी उपाध्याय: डा. रमेशचन्द्र शुक्ल:, श्री हंसराज-अग्रवाल: श्री चारुदेव शास्त्री, डा. कपिलदेव द्विवेदी, डा. रामकृष्णाचार्य: डा. बाबूराम-त्रिपाठी. आ रामचन्द्र-मिश्र:, डा. रेवाधर-द्विवेदी श्री उमा-कान्त शुक्ल:, डा. राजकिशोर सिंह: धर्मेन्द्रनाथ शास्त्री च।

अद्यतनीयं गद्यं समास- रहितं वर्तते । प्रसादगुणशैली एवास्य विशेषता। अद्य चमत्कारातिशयोक्ति: विद्वता प्रदर्शनं च नावलोक्यते गद्यसाहित्ये । अद्य तु यत्गद्यं पाठकाय तथ्यं प्रकटयति तदेव शोभाधायकं परिगण्यते विद्वद्भि:।

आधुनिक समाजस्तु तथाभूतं साहित्यं वाञ्छति, येन तस्य बुद्धौ भारं न पतेत्। अत एव समाज: सम्प्रति सरलां सुस्पष्टां च शैली स्तुवति।

किम्बहुना, प्रस्तुत-गद्यकाव्यस्य लेखकस्यापि स्यान्नाम अयमेव उद्देश्य: स्यात्। एतस्मादेव स सामाजिकीं सर्वसाधारणां, समयानु-सारिणीं च कथां परिगृह्णाति। एषा कथा अनेन लेखकेन अति-सरल-संस्कृत-भाषायां निबद्धा, येन साधारण-संस्कृत-ज्ञातार: संस्कृत छात्राश्च पठित्वा आनन्दानुभवं कुर्यु:। अत्र वक्तु शक्यते यदस्मै लेखकाय इदं श्रेयो गच्छति, येन सर्वसाधारण-कृते संस्कृत-भाषाया: प्रयोग: कृत। सहैव च इमां भाषां प्रति जनानुराग आकृष्ट:।

अस्य 'उपन्यासस्य' कथानकं सामाजिकं वर्तते। सन्तोष सिंहः प्रस्तुत-उपन्यासस्य कथानायको विद्यते नायिका च प्रीतिः यथा हि अद्यतनीय - चलचित्रीय - कथानकेषु अपि दृश्यते यत्प्रतिनायकं विना कथानकं निष्प्राणं भवति, यः प्रीतिं बलपूर्वकं स्ववशे कर्तुमिच्छति। तस्य मित्राणि अपि तथा विधानि भवन्ति, यानि तत्कृते उचितानुचितं कार्यं कुर्वन्ति। परं हुकम सिंहः सन्तोषस्य प्रीतेश्च प्रणयं भेत्तुं यदा न शक्नोति तदा स एकदा सन्तोषस्य हत्यामेव करोति। मरणसमये सन्तोषः प्रीतिं हुकम-सिंहात् नैय्यायिकरूपेण प्रतिकारं गृहीतुं प्रतिवचनं गृह्णाति। तस्मिन् समये तु हुकमसिंहः धन-बलेन अभियोगात् आत्मानं रक्षति परं यदा प्रीतिः 'वक्कोल'-परीक्षाम् उत्तीर्य्य सफल-वाक्कीलो भवति तदा सा पुनः हुकमसिंहम् अभियोगे नियोजयति स च आजीवनं कारागारं प्राप्नोति। एवं स्वप्रियतमाय सन्तोषाय दत्तं प्रतिवचनं पूरयित्वा एव विरमति। अत्रैव इदं कथानकं समाप्तिं याति।

अवशिष्टस्य कथानकस्य आनन्दं पाठकाः पठित्वा एव लभेयुः तदैव शोभनं भवेत्। इदं लघुकथानकं लेखकेन, यथा मया उपर्युक्त पंक्तिषु स्पष्टीकृतम्, अति सरलया परं मर्मस्पर्शिन्या भाषया निबद्धम्। अन्यपात्राणि यथायथं स्वकार्यं प्रति पूर्णरूपेण अत्र संलग्ना सन्ति, इदं ज्ञानन्तु पाठकः पठनसमये यत्र तत्र करोत्येव।

अत्राहं वक्तुकामोऽस्मि यत् लेखकस्य प्रथमा रचना "यौतुकम्" यच्च सामयिको व्यंगप्रधानश्च लघुकथासंग्रहो विद्यते गद्यकाव्यस्य ईदृशीमेव आधुनिक-भाषाशैलीं प्रस्तौति। पाठकाः

प्रार्थ्यन्ते यत्ते इमां रचनाम् अवश्यमेव पठेयुः। अनन्तरं लेखकस्य अन्या अपि रचनाः सन्ति, यासु कतिपया मुद्रणालये अपराश्च पूर्णताया निकटे विद्यन्ते।

आशासे, लेखकोऽयं शीघ्रमेव एता रचनाः समाज-समक्षे पुरस्कृत्य यत्र समाजस्य संस्कृत ज्ञातृणां प्रशंसायाः पात्रं भविष्यति तत्र संस्कृत साहित्यं स्वयमपि समृद्धम् भूत्वा लेखकं प्रति ऋणी भविता।

ओम् प्रकाश शर्मा
एम. ए., शिक्षा शास्त्री, साहित्याचार्यः
प्रवक्ता
सर्वकारीय-संस्कृत-महाविद्यालयः
नाभा, पटियाला (पंजाब)

॥ गुरवे नमः ॥

१

ग्रामं परितोऽन्धकार आसीत् । अरण्यवद् ग्रामः प्रतीयते स्म । न कोऽपि ज्ञातुं शक्नोति स्म यदत्र कोऽपि ग्रामोऽपि वर्तते, परञ्च कुत्रापि कोऽपि दीपकः प्रज्जवलति स्म, यस्माज्ज्ञायते. यत् कोऽपि ग्रामोऽस्ति । अस्य ग्रामस्य एकस्मिन् गृहे एव संतोषः, दीपकस्य प्रकाशे पठति स्म । अकस्मात् स चिन्ता मग्नो जातः । सोऽचिन्तयत्—"रात्रेरन्धकार इव मे जोवनम् । तेजासिंह इव, मम आचार्य-परीक्षा निष्फलैव गमिष्यति । न खलु किमपि प्रयोजनं पठनस्य । अनेके युवका जोवनवृत्तिहीनाः सन्ति । यदि मम गणना अपि तेषु भविष्यति तर्हि हन्त ! दुर्भाग्यम् । तस्य चिन्ता सन्ततिम् अकस्मात् तस्य माता त्रोटयन्ती अवदत्-"तव शयनेच्छा न वर्तते ! अर्धरात्रिर्व्यतीता" । मातुः वचनानि श्रुत्वा स चकितो भूत्वा शोघ्रमेव तूलिकां परिगृह्य अस्वपत् ।

संतोषसिंहः स्वमातुः पितुश्च लालितः सुत आसीत् । न केवलं मातुः पितुश्च किन्तु सर्वेषां प्रतिवेशोनामपि स प्रोतिपात्रम् आसीत् । यदा संतोषः षष्ठवर्षदेशीयो जातः तदा तस्य जनकस्तं नीत्वा ग्रामस्य विद्यालये प्रवेशार्थं गतः । तस्मिन् दिवसे प्रवेशं गृहीत्वा संतोषः स्वपित्रा सह प्रत्यागच्छत् । आगामीनि दिवसे यदा तस्य जनकस्तं नोत्वा विद्यालयेऽगच्छत्, तदा 'प्रार्थना' भवति

प्रीतिः

स्म, प्रार्थना-मध्ये तं स्थापयित्वा स प्रत्यागच्छत् परञ्च संतोषो ऽध्यापकानां भयकारणात् स्वपितुः पूर्वमेव चौर्यरुपेण गृहे प्रत्यावर्तत, माता तं पितुः पूर्वमेव गृहे आगतं दृष्टा आश्चर्यचकिता ऽभवत् । माता तं प्रेम्णा कारणंम् अपृच्छत सोऽपि सत्यम् अवदत् ।

आगामीनि दिवसे तस्य जनकः, तेन सह तस्य ज्येष्ठ-भ्रातारं दर्शन सिंहं प्रेषयत् । कतिपय दिनानि यावत् दर्शन सिंहस्तेन सह विद्यायम् अगच्छत् । तेनैव सह च अवकाश-समये प्रत्यागच्छत् । अधुना संतोषस्य मनसि पठनं प्रति रुचिरुत्पन्ना, अतः स दर्शनं विनापि विद्यालयं प्रयाति स्म यदा स द्वितीय-कक्षायामासीत् तदा तस्य मैत्री प्रतिवेशिनः पुत्रेण रमेशेन सह जाता । रमेशः स्वेच्छाचारी बालक आसीत् स विद्यालये न गच्छति स्म परञ्च खेलने एव स्व विद्यालयस्य समयं नष्टं कृत्वा गृहं प्रत्यागच्छति स्म । सम्प्रति संतोषोऽपि विद्यालयं न प्रयाति स्म किन्तु रमेशेन सह श्मशानालये गत्वा सिकतायाः गृहाणि विरचय्य खेलति स्म । दिष्ट्या, तस्य प्रतोलिकायाम् अमरामरजीत-नामकौ अध्यापकौ निर्वेशे गृहे प्रतिवसतः स्म । तौ तं कुमार्गात् अनिवार्यताम् अन्यथा सोऽपि रमेश इव एकस्याम् एव कक्षायां कतिपय-वर्षाणि व्यर्थम् यापयेत्, यतः रमेशः पंचम-कक्षायां पंचवारम् अनुत्तीर्णोऽभूत् ।

इदानीं संतोषः प्रतिदिनं विद्यालयं गच्छति स्म । स प्रतिवर्षं कक्षायां प्रथमः तिष्ठति स्म, यस्मात् सोऽध्यापकानां

 प्रीतिः

प्रीतिपात्रोऽपि जातः। यदा तेन दशम-कक्षायाः परीक्षा दत्ता तदा तस्य माता रुग्णावस्थायामासीत्। तेन परीक्षा तु द्वितीया-श्रेण्याम् उत्तीर्णा, परञ्च तस्य माता तस्य परिणामं श्रवणात् पूर्वमेव स्वर्गं गता। तस्य मातुरिच्छा आसीत् यत् तस्य पुत्रः, उच्चाधिकारी भवेत्। अहं तु लोकानां वस्त्राणि सीवित्वा (सीकर) एव स्व जीवनं यापयिष्यामि। संतोषः मातुः मृत्योः संतापं सोढुम् असमर्थोऽभवत्। अस्मात् संतापात् तस्य जीवनस्य एकः स्वर्णिम वर्षः, व्यर्थो जातः। तस्य जीवने जीविकाया अनेके अवसरा आगताः परञ्च अधुना तु तेन प्रतिज्ञा एव कृता आसीत् यत् स स्वमातुरिच्छां पूर्णां करिष्यति।

आगामी वर्षे एव स स्व गृहस्य स्थितिं पश्यन्नपि फरीदकोट-नगरे महाविद्यालये प्रवेशं गृहीतवान्। सु-अंकान् दृष्टवा प्रधानाचार्यः तस्य शुल्कमपि अक्षमत्। तस्य कृते इदमेव बहुमूल्यं धनमासीत्। स विद्यालये स्वल्पमेव वदति स्म। छात्राः तं 'शर्मीला' इति नाम्ना अपि उदघोषयन्ति स्म। स प्राध्यापकानाम् अमित-सत्कारं करोति स्म, सः प्राध्यापकान् पितृ-सदृशमेव मनुते स्म। प्राध्यापका अपि तस्मै स्निह्यन्ति स्म यस्य परिणामो ऽयं जातः स प्रथमवर्षे एव स्वर्णपदकं लब्धवान्। परञ्च सन्तोषोऽधुनापि अति-सरल आसीत्, अभिमानात् दूर एव आसीत्। स पूर्वमेव महाविद्यालये आगच्छत्। 'समयो व्यर्थो न भवेत्' एतदर्थं स कक्षा-प्रकोष्ठे गत्वा पठने मग्नो भवति स्म। यदा अन्ये तस्य सहपाठिनः बालिकाभिः सह चायपाने समयं व्यर्थं नयन्ति स्म। संतोषस्य समीपे यद्यपि समयो भवति स्म,

प्रीतिः

तथापि स पुस्तकालये एव यापयति स्म। तस्य सहपाठिकाः तं प्रेम्णा उपहसन्ति स्म। स तु हसन् एव अग्रे प्रयाति स्म। एकदा तस्य सहपाठिका रंजीता, आगच्छन्तं तं दृष्टा स्व सखीम् अकथयत् —"कमलजीते, प्रेम तु संतोष-सदृशेन युवकेन सह भवेत् यो लज्जाशीलः प्रेम्णः परिभाषामपि न जानाति। सत्यम्, संतोषः प्रेम्णः परिभाषामपि न जानाति स्म। स न जानाति स्म यत् प्रेम कस्य वस्तुनः नाम ?"

प्रेम तु ईदृशी वस्तु वर्तते यस्य स्थानं प्रत्येक-मनुष्यस्य हृदये वर्तते। स. पुरुषो नास्ति यस्य हृदये स्नेहं नास्ति। अस्य प्रेम्णः एका ज्वाला संतोषस्य मनसि अपि आसीत् या प्रोतेः, प्रेमपीयूषपूर्णे संलापे प्रज्ज्वलति स्म।

प्रीतिः, यस्याः वस्तुतः नाम "कर्मजीत कौर" इति आसीत्। यत्र संतोषः छात्रेषु कुशलतमः तत्र सा छात्रासु कुशलतमा। यदि संतोषः परीक्षायां प्रथम स्थानं प्राप्नोति स्म तर्हि सा अवश्यमेव द्वितीय-स्थानं गृह्णाति स्म। संतोषस्य श्रेष्ठतायाः कारणात् सा तं प्रति आकर्षिता जाता। द्वयोः प्रेम्णः ज्वाला तस्मिन् समये हृदयात् निष्क्रम्य बहिरागच्छत् यदा द्वावेव महाविद्यालयस्य वार्षिक-समागमे पारितोषिकं प्राप्तवन्तौ।

वार्षिक-समागमानन्तरं द्वयोः नेत्राणि कतिपयवारममिलन् परं मिलित्वा अपि किमपि कथयितुं समर्थाणि न जातानि। हृदय एव हृदस्य मार्गं जानाति। केनचित् उक्तम्-"हृदयस्तु समुद्रा — दपि गम्भीरः, को ज्ञातुं प्रभवति हृदयस्य वार्ता,"।

स्व हृदयस्य वार्तां प्रकटयितुम् एकदा प्रीतिः समयं लब्धवती। संतोषः, अमर-नामक-उपवने उपविष्टो लेखने तल्लीन आसीत्। प्रीतिः अचिन्तयत्-"अद्य तु स्वर्णमय-समयः, पुनः न आगमिष्यति" सा निजसखी-रंजीतया सह तस्य पार्श्वे आगच्छत्। तां दृष्ट्वा तस्य मुखं पीतमभवत्। प्रीतिः अपि यदा तम् अपश्यत् तदा तस्य हृदयोऽपि अकम्पत, परं सा धैर्यं धारयित्वा अवदत्-"संतोष! स्व-पुस्तकं मह्यं देहि, परेद्युः महाविद्यालये एव दास्यामि।" संतोषः कम्पमानाभ्याम् हस्ताभ्याम् पुस्तकं तस्यै दत्तवान्। पुस्तकं गृहीत्वा, स्नेहपूर्णाभ्यां नेत्राभ्यां संतोषं प्रति दृष्ट्वा अवदत्-"रंजीते! अहं तु भयमनुभवामि।" 'कथम्' रंजीता अकथयत्? प्रीतिः प्रत्यवदत् '-यत् संतोषः, आवयोः आक्षेपं प्रधानाचार्य-समीपे न कुर्यात् यत् एते बालिके मम अवक्षोभनं कुरुतः स्म।"

प्रीतेः वचनानिश्रुत्वा सा स्व हास्यं निरोद्धुं सफला न जाता। यदा संतोषः प्रीतेः मुखं प्रति अपश्यत् तदा सः अनुभवमकरोत्यत् प्रीतेः नेत्रे तस्य मुखे एव स्तः। यदा रंजीता, प्रीतेः अङ्गुलीतर्जनमकरोत् तदा तस्याः नेत्रे तस्य मुखात् दूरे अभवताम्। प्रेम-समुद्रे निमग्ना प्रीतिः रंजीतां कक्षां प्रति गन्तुं स्थाने छात्रावासं प्रति गन्तुम् अकथयत्। छात्रावासे गत्वा सा प्रेमस्वप्नेषु निमग्ना जाता।

★

२

प्रेम तु अमितं बलं धारयति। पाषाणमपि मधुजं करोति, मधुजं च पाषाणं विदधाति। यः पुरूषः कदाचिदपि केनचित् सह प्रेम न अकरोत् तं तु प्रेम स्वपाशे बद्धवा उन्मत्तं करोति। संतोषेण सह एवम् अभवत् यः प्रेम नामकं वस्तुं कदापि न अपश्यत्। महाविद्यालये यदा तयोः नेत्राणि परस्परं स्नेहं प्रकटयन्ति स्म, तदा मन्दहास्यमेव कुरूतः स्म. परञ्च हृदयस्य वार्तां कोऽपि कथयितुं न शक्नोति स्म। यस्मात् दिवसात् प्रीतेः समीपे संतोषस्य पुस्तकमासीत्, तस्मात् दिवसाद् एव स चेतनाहीनोऽभवत्। यतः सा पुस्तके स्व प्रेम्णः हस्तलाघवं (जादू) कृतवती। यदा संतोषः पुस्तकमुद्घाटयत् तदा हस्तलाघवः स्व कार्यं कृतवान्। अधुना तु खेलने, पठने, खादने, पाने, लेखने च प्रीतिः, एव सम्मुखे दृष्टिगोचरा भवति स्म। किम्बहुना, पुस्तकस्यवर्णाः अपि प्रीतेः चित्तमिव प्रतीयन्ते स्म। यस्मिन् दिने महाविद्यालये न आगच्छति स्म तस्मिन् दिने संतोषोऽपि गृहमेव प्रत्यागच्छति स्म।

अधुना तु अध्यापका अपि आश्चर्य-चकिता आसन्, तस्य भर्त्सनामपि चक्रुः। परं स किं कुर्यात् प्रेम्णः मोद-कारणात् तस्य चेतना शक्तिः निर्बला जाता। परञ्च प्रीतेः चेतना-शक्तिः

प्रीतिः

सबलाऽभवत् साव‌ऽदत्-संतोष ! का अवस्था-भवतः ? किम्इत्थं कर्तुम् अहं स्नेहं करोमि ? यदि इत्थमेव भवान् कर्तुमिच्छति तदा तु शिक्षां मध्ये त्यक्त्वा स्वग्रामं प्रति गच्छामि। यदि मम अवस्था अपि तव सदृशा जाता तदा आवयोः जीवनं नरक-सदृशं भविष्यति, स्वर्ग-सदृशं न। मातुः पितुश्च समक्षे किं मुखं नीत्वा गमिष्यावः।" प्रीतेः सत्य-वचनानि श्रुत्वा संतोषस्य मस्तिष्कं निज स्थाने स्थितम्। नम्रमुखः संतोषः, अकथयत्—"उचितं कथितं भवत्या, यदि ईदृशी एव स्थितिः भविष्यति तदा तु मातुः पितुश्च लभ्यांशः व्यर्थो भविष्यति"। इति श्रुत्वा साऽवदत्—"अधुना तु अंह चलामि यदि श्वः भवतः मुखं संतापयुक्तं जातम् तदा तु भवान् मम मुखमपि द्रष्टुं न पारयिष्यति"। संतोषः अधुना अपि नम्रमुखं कृत्वा भयभीत इव स्थितः। यदा स मुख-उपरि कृत्वा अपश्यत् तदा तु प्रीतिः तत्र नासोत्।

पुष्पमिव विकसित संतोष-मुखं दृष्ट्वा प्रीतिः हृदयमपि प्रफुल्लितमभवत्। प्रेम एकस्मिन् नूतनरुपे परिवर्तितम्। प्रेम—शब्दस्य अर्थान् तौ (सः च सा च)सम्यग् ज्ञातवन्तौ। दिष्ट्या, ज्ञानमपि तस्मिन् काले अभवत् यदा तौ स्वमार्गात् भ्रष्टौ जातौ, अन्यथा तु न जाने किं भविता ? साम्प्रतं तौ मिलित्वा प्रेमवर्तासु समयं व्यर्थं न कुरुतः स्म परञ्च पठनस्य विषये चिन्तयतः स्म।

द्वयोः पावन-प्रेम्णः चर्चा कक्षायाः प्रत्येक-छात्रः कर्तुम् गौरवमनुभवति स्म। प्रत्येक-छात्रः स्व-सहपाठिनं कथयति स्म यदि मित्र, उन्नतवृक्षस्य उन्नतं बदरिका फलम् अत्रोटयत् तर्हि

प्रीतिः

संतोष एव। वयम् अम्ल-बदरिकानां योग्याः एव स्म । यद्यपि संतोषः छात्राणां समीपे गच्छति स्म, तदा सर्वे वदन्ति स्म "मित्र। अधुना त्वं अस्माभिः सह वार्ता न करोषि, कथं कुर्यात् ? यतः; उन्नत-बदरिका फलं प्राप्तवान् । संतोषः श्रुत्वा, स्व चेतसि मोदकान् त्रोट्यन्, स्मित्वा एव अग्रे गच्छति स्म। परञ्च तत्र तयोः स्नेहस्य शत्रवः अपि आसन् । ते तयोः स्नेहं विषम् इव अनुभवन्ति स्म। हुकम-सिंहः तेषां शत्रूणाम् अग्रणी आसीत्। स भाणा-नामकस्य ग्रामस्य एकस्य धनिकस्य सुत आसीत्। एकलः पुत्रत्वकारणात् बाल्यकालात् एव नृशंसः, स्वेच्छाचारी च आसीत् । अतः महाविद्यालयेऽपि स स्वगुणान् प्रकटयति स्म। अन्यच्च धनिकस्य अमरसिंहस्य अपि स्व ग्रामस्य समन्तात् प्रयाप्तः प्रभाव आसीत् यस्मात् कारणात् हुकमसिंहस्य अग्रे कोऽपि वक्तुं न शक्नोति स्म। हुकमसिंहस्य नेत्रेऽपि प्रीतेः उपरि आस्ताम्, यतो हुकम सिंहस्य व्यवहार एव ईदृश आसीत् यत् स कामपि बालिकामपश्यत्, विकसनात् पूर्वमेवतां त्रोटयति स्म। इदानीं स प्रीतिं स्व पाशे बन्दीकर्तुं प्रायतत। स प्रीतिं कतिपय वारं कुशब्दान् कथितवान्। एकदा सः, अकथयत्- "शीलं त्यज, अन्यथा उत्थापयिष्यामि"। सा तु तस्य वचनानि पालिका इव (पतासे की तरह) त्रोटयन्ती अग्रे गच्छति स्म। तस्य दुष्टाः सखायः अपि कतिपय-वारं प्रीतिं तर्जितवन्तः परञ्च सा सर्वेषां मुखे मुखस्रावं चकार। अधुना सा सर्वान्, मूर्खान् एव मत्वा उपहसति स्म, यत् तस्याः प्रेम तु सुशील-छात्रेण सह जातम्, सा तु स्वाभिमानी छात्रा आसीत्। कोऽपि तया सह वार्ता-करणेऽपि भयमनुभवति स्म।

परीक्षाया दिवसा आगताः। सर्वे पठने रताः तावपि स्नेहमदे अपि पठने अपि च रतौ- आस्ताम् । पुनरपि अन्य-छात्राः चिन्तयन्ति स्म यत् अस्मिन् वर्षे संतोषः सफलो न भविष्यति। कतिपय वारं संतोषः तेषां वार्ताम् अश्रृणोत्। सोऽ चिन्तयत् -"यत् ते सर्वे सत्यं वदन्ति। क्रोधाय किमपि स्थानं न अस्ति। अहं तु तेषां वार्ता प्रति ध्यानं न दास्यामि। परञ्च अहं स्व स्नेहस्य शपथं करोमि, यदि प्रथम इति निर्दिष्टो नाभवम् तर्हि स्नेहम्, स्नेहं न ज्ञास्यामि।" स स्व मनसि प्रतिज्ञां कृतवान् यत् स पठने अत्यधिकां रुचिं दर्शयिष्यति। परीक्षाया ज्ञानमपि न अभवत् कदा आरब्धा कदा च समाप्ता। संतोषस्य स्व परिश्रमस्य स्नेहस्य च उपरि पूर्ण—विश्वास आसीत् यतः स 'प्रथम' आगमिष्यति।

सर्वे छात्राः परीक्षां दत्वा स्व-स्व गृहाणि प्रत्यागच्छन् परञ्च तयोः हृदयं गृहं प्रति गन्तुं न कमपि संकेतं करोति स्म वियोगावस्थां सोढुं न शक्तौ आस्ताम्। अधुना तु वियोगावस्था अवश्यमेव आगमिष्यति, न कोऽपि दूरी-कर्तुं समर्थः, यतः प्रधानाचार्यः छात्रावासं शून्यं कर्तुम् आदेशं दत्तवान्। तौ इमम् आदेशं कारागारमिव अन्वभवताम्, वियोगाग्नौ ज्वलनात् पूर्वं तौ स्व हृदयं शीतलतां दातुम् एकस्य सरोवरस्य समीपे विशाल-वटवृक्षस्य अधः, सरोवरस्य सर-सर ध्वनिं कुर्वति शीतलजले च पादौ स्थापयित्वा स्नेह-स्वप्नेषु मग्नौ अभवताम्। यदा तस्मात् स्थानात् गन्तुं प्रचक्रमौ तदा संतोषः प्रीतिं प्रीतिः च सतोषं दृष्ट्वा आश्चर्य-चकितौ जातौ, यतः तयोः नेत्रयोः स्नेह-जलं मेघस्य जलमिव वर्षति स्म।

प्रीतिः

तौ स्नेह-स्वप्नेषु संलग्नौ यदा राजमार्गे आगच्छताम् तदा स्नेह-रिपव आगच्छन् । संतोषः, भयभीतो जातः, परं प्रीतिः अवदत्—"दुष्टाः ! कि कर्तुं आगताः अहं संतोषाय स्निह्यामि वः मुखे मुखस्रावं अपि न करिष्यामि"। शृणोति श्रीमान् किम् कथयति एषा छात्रा, एकः छात्रः संतोषम् अकथयत्, यः स्व मनसि एव विषं पालयति स्म ? मौनम्, रे दुर्जन ! जानामि तव शक्तिम् अपि, यदि स्व मातुः पुत्रः अस्ति तर्हि मम समक्षे आगच्छतु, प्रीतिः सिंही इव वदति स्म । हुकम सिंहः किमपि न अवदत्। स्व मित्रैः सह प्रत्यागच्छत् तथा च गच्छन् एवम् अवदत्—"अद्य अहं शक्तिं दर्शयितुं न आगतोऽस्मि, यस्मिन् दिने आगच्छम् तस्मिन् दिने स्वसृमाता (नानी) स्मरण-पथे आगमिष्यति । गच्छ, गच्छ, तव सदृशाः अनेके बलशालिनो मया दृष्टाः।

संतोषः प्रीतेः वचनानि श्रुत्वा नम्रोऽभवत् यतः स तु इदानीं यावत् कुशब्दं स्वमुखात् न अकथयत्। स आश्चर्यचकित आसीत्। प्रीतिः तं हसन्ती अवदत्-"प्रिय ! कथं आश्चर्यचकितः असि ? न भयस्य आवश्यकता, ईश्वरः साहाय्यं भविष्यति" परम् प्रीते ! तेषां पार्श्वे धनं वर्तते। धनात् नृशंसा पुरुषाः सर्वं कर्तुं शक्नुवन्ति । किम् तावत् ?

किम् अस्मांक समीपे धनं नास्ति। सर्वं वर्तते । अहमपि लम्पटान् विक्रेतुं समर्था अस्मि । अयं दुष्टः कस्य उपवनस्य

प्रीतिः

मूलिका वर्तते । अधुना तु स्नेह-वार्ता एव कर्तव्या । प्रेम्णः वार्तायां तव रूपं रूपयितुमिच्छामि । मम रूपं तु तव रूपमेव अस्ति । प्रीतेः प्रत्युत्तरं श्रुत्वा, संतोषस्य मुखे प्रसन्नतायाः बिन्दवः आगताः । प्रीतिः तृष्णा-पूर्णाभ्यां नेत्राभ्यां पश्यन्ती छात्रावासस्य द्वारे सहसा प्राप्ता । संतोषः तां पश्यन् सरस-संसारस्य स्वप्नेषु एव मग्नः स्व प्रकोष्ठं प्रति; अचलत् ।

३

छात्रावासे गत्वा प्रीतिः स्व शयनोपकरणानि, वस्तूनि च बन्धने रता, परञ्च रात्रिः तारकमण्डल-निरीक्षणे व्यतीता। संतोषोऽपि प्रतीक्षते स्म यत् कदा सूर्यदेवः दर्शनं दास्यति, तदैव प्रियायाः मुखं दृष्ट्वा जीवनं सफलं भविष्यति। सूर्यदेवः स्व रश्मिभिः तिमिरं दूरी-कृत्य चतुर्षु दिक्षु प्रकाशं चकार. संतोषोऽपि सूर्य-देवस्य प्रकाशं दृष्ट्वा उदतिष्ठत्, महाविद्यालयं प्रति च अगच्छत्। प्रीतिः तस्य प्रतीक्षायामेव आसीत्। यदा सा संतोषं अवलोकयत् तदा सा स्वयमेव तं प्रति अचलत्। तौ परस्परं दृष्ट्वा आनन्दितौ जातौ। छात्रावासस्य समीपस्थ उपवने उपविश्य प्रेम्णः शपथं गृहीतुं मग्नौ जातौ। प्रीतिः अवदत्-"प्रिय। अहं मात्रा पित्रा च सह वार्तां करिष्यामि, त्वां पत्रेण आनन्द-समाचारं प्रेषयिष्यामि।

संतोषोऽकथयत् –'प्रिये! यदि "राञ्झा" इव कर्णयोः छिद्राणि कर्तुम् आवश्यकता भवेत् तदा अहं कर्णयोः छिद्राणि अपि करिष्यामि, परञ्च त्वाम् अवश्य प्राप्स्यामि" इत्थं कथयन् स स्वहस्तं प्रीतेः हस्ते दत्तवान्। मनसि दुग्धमिव क्वथनम् (उबाल) आगतम्, परञ्च शीघ्रमेव धैर्यं धृतवन्तौ यतः, तौ शून्ये स्थाने आस्ताम्। सा स्वहस्तम् तस्य हस्तात् दूरी कृतवती। अकस्मात् तस्यः सखी रंजोता आगत्य अकथयत्-' महाराज्ञि। किं

प्रीतिः

ग्रामं गन्तु न, इच्छसि ? अद्य तु छात्रावासे रात्रि यापनस्य आज्ञा न वर्तते तौ तया सह आगच्छताम्। छात्रावासात् वस्तूनि उत्थाप्य त्रिचक्रिकां (रिकशा) नीत्वा मोटरयानस्थलं (बस स्टैण्ड) प्राप्तवन्तौ । परञ्च मोटर-यान-समागमने बिलम्ब आसीत्। तौ प्रेमकर्तुं समयं प्राप्तवन्तौ परञ्च कस्मिश्चित् समये देवो ऽपि स्नेह मध्ये बाधां ददाति यतः तौ पण्य भोजनालयं (होटल) प्रति गन्तुं प्रवृतौ तदा एव मत्तरम् आगतम्। अश्रुपूर्णाभ्यां नेत्राभ्यां प्रीतिः मोटरयाने आरोहत् मोटरयानमपि शीघ्रमेव गत्याम् आगतम्। संताषः मत्तरम् प्रति एव पश्यति स्म यावत् पर्यन्तं नेत्राभ्यां दूरी न अभवत्। तदा तस्य हृदयः धैर्यहीनो जातः। हृदयं नियन्त्रितं कृत्वा प्रकोष्ठं प्रति गतः। स स्व वस्तूनि स्कन्धे एव उत्थाप्य, मोटरयानालये समागतः। बाजाखाना नगरं प्रति गन्तुम् मोटरयानं गतिशीलं आसीत्। स आरोहत्। प्रेम-स्वप्नेषु स न अजानात् यत् कदा बाजाखाना नगरम् आगतम्। तत्र अवातरत्, चायपानार्थं पण्याजीवकम् आदिशत्। स पानपात्रं तु पण्याजीवकात् अगृह्णात् परञ्च पातुं समर्थो न जात, यतः प्रीतेः चित्रम् पानपात्रे आगत्य तं कथयति स्म- 'प्रियतम ! एकाकी एव चायपानं करोति, मम नामाऽपि न स्मरति"। येन केन प्रकारेण सः पातुं प्रयत्नं चकार किन्तु तदा एव रूपमोटरयानं सत्तावतपुरा नगरं प्रति मुखं कृत्वा स्थितम्। स स्व वस्तूनि उत्थापयत्। यात्रापत्रवाहकात् (कण्डकटर) चिटिकां गृहीत्वा शून्यमेकं स्थानं (सीटमेकम्) दृष्ट्वा उपाविशत्।

प्रीतिः

मार्गे तस्य चेतः चिन्तामग्नो जात । तस्य हृदयः प्रीतेः स्नेहस्य सागरे मग्न आसीत् परञ्च यदा हुकर्मसिंहस्य ध्यानं आगच्छत् तदा स भयभीतो जातः। सोऽचिन्तयत् अहं फरीदकोट-नगरे न पठिष्यामि, प्रीतेः कृते स्व जीवनं कथं नश्येयम् ? अस्मिन् विचारे सति एकोऽन्य विचारोऽपि आगतः, यत् प्रीतिः त्वया किम् अशुभं कृतम्, सा तु त्वया सह स्नेहं कृतवती । आम्, स्नेह कृतम्, अहमपि तस्याः स्नेहस्य कृते स्व प्राणान् न गणयिष्यामि । कामम्, हुकर्मसिंह - सदृशाः अनेके व्यभिचारिणः मम मार्गे आगच्छन्तु । इत्थं चिन्तयन्नेव मोटरयानं सलाबतपुरा-नगरं प्राप्तम् । स मोटरयानात् अवातरत् । संयोगात् तस्य ग्रामस्य एव टरैक्टरयानम् अमिलत् । अन्यथा तु तत्रैव रात्रिः व्यतीता स्यात् यतः कस्यचिदपि मोटरयानस्य अधुना समयो न आसीत् ।

सः तारका-निर्गमनाद् एव पूर्वं स्वपितुः अंके प्राप्तः । पितुः अंके उपविशन् तस्य नेत्रयोः अश्रूणि समागतानि यत् मातुः अंकस्यानन्दम् तस्य पार्श्वे नासीत्, परिश्रमात् स शीघ्रमेव अस्ववत् ।

प्रीतिः

{ ४ }

ज्येष्ठोऽयमासः।

कृषकाः स्व रक्त-स्वेद-युक्त उपार्जितम् धान्यं गृहे आनेतुं संलग्ना दृश्यन्ते स्म। परिवारस्य प्रत्येक-सदस्यः स्व स्व कार्ये मग्नः आसीत्। संताषोऽपि स्व पित्रा सह कार्यं करोति स्म। ग्रामे स 'पाठक': इति उच्यते स्म। पाठकः 'भाईरूपा नगरात् तैलम् आनयति स्म'' इति तस्य कार्यम् आसीत्। भाई रूपा-नगरं तस्य गुमटीकला-ग्रामात् पञ्च किलोमीटरम् आसीत्। स प्रतिदिनं, द्विचक्रिकायां तैलपात्रं स्थापयित्वा, प्रात एव गच्छति स्म। अस्मात् प्रतिदिनात् क्रमात् तस्य मैत्री तैलशालाध्यक्षस्य पुत्रेण रघुवीरेण सह जाता। एकदा संतोषः स्व हृदयस्य रहस्यं तस्याग्रे अकथयत्। रघुवीरः तस्य सहायतां कर्तुं प्रतिज्ञां कृतवान् विश्वासं चाददात्।

संतोषस्य मुखं प्रतिदिनं पीतं भवति स्म तस्याः वियोगस्तं धैर्यं धारयितुं शक्तिं न ददाति स्म यत् वियोगाग्नौ ज्वलन् स खडगधारायाः उपरि गच्छन् इव प्रतीयते स्म। स वियोगं पत्रे परिवर्तितुम् इच्छां कृत्वा सदिद्वय- प्रेम-वर्णानि अलिखत्।

मम सदैव, मम प्रीतिः,

पत्रोपरि पतितानि अश्रूणि एव मम अवस्थां कथयिष्यन्ति।

केवलं तव,

संतोषः पाठकः वा।

प्रीतिः

स पत्रं पत्रमञ्जूषायां अक्षिपत् तथा तस्य पत्रस्य प्रतीक्षायां दिनानि अगणयत् ।

प्रीतेः अवस्थाऽपि सुचारू नासीत् । सा प्रतिदिनं कृशा भवति स्म । मातुः पितुश्च कृते सा चिन्तया विषया अभवत् माता तस्याः पार्श्वात् कारणमपि कतिपय वारम् अपृच्छत् । परञ्च सा कथयितुं असमर्था । हसन्ती एव कथयति स्म — "मात :, भवतीं भ्रमोऽभवत् ।" साऽचिन्तयत् यत् सर्वं प्रकटयामि । परञ्च कथयितुं तस्याः पार्श्वे बलं नासीत् । सा संतोषाय क्रुध्यति स्म यत् स पत्रमपि न अलिखत् । प्रेम्णः शपथं केवलं शपथमासीत् सत्यं न, परञ्च स किं कर्तुं शक्नोति । तस्य तु इमं भयमपि आसीत् यदि पत्रं मम मातुः पितुश्चहस्ते प्राप्तम् , तदा श्रेष्ठं न भविष्यति । मम तु कर्त्तव्यं वर्तते यतः अहं तु पत्रं लिखितुं प्रतिज्ञां कृतवती यत् माता सह वार्तां कृत्वा लेखिष्यामि इत्थं चिन्तायां तस्याः दिवारात्रं व्यतीतं भवति स्म । सा स्व सतोषं प्रति प्रेम, मातुः अग्रे कथयितुं न शक्नोति । कथं शक्नोति स्म यत् अस्माकं समाजः, एवं कर्तुं आज्ञां न ददाति । द्वौ हृदयौ एकं द्रष्टुं न शक्नोति । दुःखानि श्रुत्वा उपहासं करोति । प्रीतिः अपि अस्मिन् समाजे उत्पन्ना, एषः समाजः कथं क्षमां कर्तुं शक्नोति । समाज-भय-कारणात् सा स्व प्रेम प्रकटयितुं न समर्था । सा स्व भ्रातृजायायाः पार्श्वे अपि हृदयस्य वार्तां कर्तुं धैर्यम् अधारयत् परञ्च समाजस्य त्रासः तस्याः शिरसि आसीत् । अतः तया सह अपि सा वार्तां कर्तुम् असफला अभवत् । अधुना स्व हृदये एव प्रणयम् आकुञ्चय समयं यापयति स्म । अति कृशा जाता ।

प्रीतिः

एकदा सा अति चिन्ता मग्ना आसीत्। प्रकोष्ठे काकः कायति स्म। सा तम् उत्थापयितुं यत्नं करोति स्म। परञ्च पुनः पुनरागत्य उपविश्य कायति, स्म साऽवदत् किम् कायति. तव ध्वनिः 'आम्' कदापि न कथयिष्यति, 'न' एव कथयिष्यति। कोऽपि न आगमिष्यति व्यर्थमेव कायति। मम हृदयं तु त्रोटयति अद्य तु तस्य 'कां कां' इति ध्वनिः 'हां हां' रूपे परिवर्तिता। यदा सा तं उत्थापयितुं, लोष्ठम् उत्थाप्य स्वकर-उपरि कृतवती तदैव तस्याः माता आगत्य अकथयत्-"सुते तव पत्रमागतम्, तव सख्युः प्रतीयते।" प्रीतिः पत्रं नीत्वा अवदत्- "आम्, सख्युः एव अस्ति।" परञ्च सा नाह्यनाम्ना एव अभिजानाति स्म यत् पत्रम् तस्याः प्रियस्य अस्ति यदा तस्याः माता तां प्रति पृष्ठं चकार तदा सा पत्रम् आलिङ्ग्य स्व वक्षसि अस्थापयत्। स्व प्रकोष्ठे गत्वा पत्रम् उद-घाट्य अपठत्। पठित्वा तस्याः अश्रूणि तस्य अश्रुभिः सह मिलित्वा एकाकाराणि जातानि। तस्याः नेत्राभ्याम् अश्रूणि असकृत् अवहन्, परम् मातुः भयकारणात् सा तानि अरूणोत्। बहिरागच्छत्, यदा तस्याः माता तामपश्यत् तदा सा 'प्रसन्ना' इति प्रतीयते स्म। बहिरागत्य सा स्व मात्रा सह कार्ये संलग्ना ऽभूत् तां दृष्ट्वा जननी अतिप्रसन्ना आसीत्।

माता अवदत्—"कस्य अपि विशिष्टायाः सख्युः पत्रं वर्तते।" 'आम्, मातः।' 'तर्हि अतिप्रसन्ना दृश्यसे।'

साम्प्रतं प्रीतिः प्रसन्ना आसीत् परञ्च चिन्तामग्ना आसीत् यत् पत्रस्योत्तरं केन प्रकारेण दद्यात्। अन्ते सा स्व मनसि

प्रीतिः

वचनं कृतवती यत् सा स्त्र मात्रा सह वार्ता कृत्वा एव पत्रं लेखिष्यति । अस्मिन् संकटे सा स्व सख्या सह वार्ता कर्तु अविचारयत् , यतः विपत्ति-समये मित्राणि एव सहायतां कुर्वन्ति अन्ये सर्वे उपहासं कुर्वन्ति सा प्रातरेव मातरमवदत्-' मातः ! अहं मम सख्याः रञ्जीतायाः पार्श्वे गन्तुम् इच्छामि सायंकाले प्रत्यागमिष्यामि ।' माता प्रत्यवदत्-''पुत्रि ! तव इच्छा ।' सा आज्ञां नीत्वा रञ्जीतां प्रत्यचलत् । यदा सा फरीदकोट-नगरं प्राप्ता तदा तस्याः दृष्टिः हुकमसिहस्योपरि पतिता यः तत्रैव स्थित आसीत् । परञ्च स तां नापश्यत् ।

सा त्रिचक्रिकां नीत्वा स्व सख्युः गृहे प्राप्ता । तस्याः सहसा आगमनं दृष्ट्वा साऽपि चकिता इव जाता । द्वे मिलित्वा वार्तां कृत्वा हृदयानि शून्यानि कृतवत्यौ, वार्तासु एव प्रीतिः अवदत्-'सायंकाले प्रत्यगमिष्यामि ।' 'किं कर्तुम् आगता' ? 'सर्वमेव, तव पार्श्वे एव आगताऽस्मि एकस्य कार्यस्य आशां कृत्वा'।

'तव कार्यं तु संतोषः करिष्यति ।' 'नहि, रञ्जीते, तत्कार्ये संतोषस्य वशं नास्ति ।' 'यदि अहं कर्तुं शक्नोमि तर्हि शीघ्रं कथय ।' रञ्जीते, इयं वार्ता-'यत् संतोषस्य पत्रमागतम् ।' किं जातम् ?' श्रूयताम् , तव तु उपहासं बिना अपरं कार्यं न यदि श्रोतुम् इच्छा नास्ति तर्हि अहं न कथयिष्यामि ।

'मम सखि, क्रोधं मा कुरू' । 'कथय, अधुना अहं मौनं भूत्वा श्रोष्यामि' । आम् । संतोषस्य पत्रमागतम् । तस्य पत्रेण यत्र

मह्यं प्रसन्नता दत्ता तत्र अप्रसन्नता अपि अहं तेन सह वचनं कृतवती यत् मात्रा सह वार्तां कृत्वा पत्रं लेखिष्यामि परं सम्प्रति अहं संकटे अस्मि यदि अहं प्रत्युत्तरं न ददामि तदा स क्रोधं करिष्यति । यदि वार्तां करोमि तर्हि माता पिता च क्रोधं करिष्यतः । 'अस्तु इयमेव वार्ता ।' आम् अस्मात् कारणात् तव पार्श्वे आगताऽस्मि । रञ्जीता तस्याः मुखं दृष्ट्वा अवदत्-"त्वम् सरला, निष्कपटा, मायाहीना च असि । ये प्रेम बन्धने बद्धाः ते न भयं कुर्वन्ति । ते मृतिकायाः घटेन सह समुद्रं तरन्ति । मनसा मा दुःखं कुरू मां प्रति पश्य, अहं तु तव सखी । अहं कमलेन सह स्नेहं कृतवती । निर्भीका भूत्वा मातरं पितरं च अकथयम् पूर्वं तु तौ मह्यम् उपदेशं दत्तवन्तौ अन्ते तौ पराजितौ अभवताम् । तौ मम विवाहं कमलेन सह कर्तुं स्वीकृतिं दत्तवन्तौ । परञ्च तावदवदताम्- "यदा स जीविकां प्राप्यसि तदा एव विवाहं भविष्यति अन्यथा न ।

'अति प्रसन्तायाः वार्ता, त्वं मह्यं न अवदः' । 'अद्यैव त्वां पत्रं लिखितुं मनः कृतम् परं त्वं स्वयमेव आगता ।'

अस्तु, रञ्जीते । त्वया राञ्ज्ञा' प्राप्तः मामपि उपायं वद । उपायम् उपायं तु समयं स्वयमेव दर्शयति । अहं तु इत्थमेव वदिष्यामि, यत् अधुना त्वं वार्तां न कुर्याः । त्वं जानासि, संतोषः निर्धनस्य परिवारस्य युवको वर्तते तव परिवारो धनिकः, अधुना स्वीकारं न करिष्यतः । मम परामर्शोऽस्ति यत् पूर्वं तौ प्रसन्नौ कर्तुं यत्नं कुर्याः संतोषः पत्रं लिख, यत् अहम् अधुना वार्तां

 प्रीतिः

कर्तुं सफला नाभवम्। लिखितुम् अपि आवश्यकता न वर्तते। स्नेह-पूर्णं पत्रं लिखित्वा पत्रमञ्जूषायां प्रक्षिप। तव स्नेहपूर्णं पत्रं पठित्वा स प्रसन्नो भविष्यति। 'अस्तु, अधुना माम् अनुजानीहि'। 'का शीघ्रता ?' 'घटिकां पश्य।' 'अस्तु, अहं चायं कृत्वा आनयामि।'

यदा ते लाइन-नामक आपणस्य मध्ये आगच्छताम् मोटरयानालयं च प्रस्थिते तदा हुकम सिंहः मंगतरायस्य पण्यशालायां आसीत्। स ते अपश्यत् शीघ्रम् आगच्छत्। परं सा पूर्वमेव गता आसीत्। सोऽपृच्छत्- रञ्जोते! सा किं कर्तुम् आगता आसीत्'। मिलितुम्, परञ्च तव किं प्रयोजनम्।' 'प्रयोजनम्, प्रयोजनम् तु समय एव दर्शयिष्यति। इति कथयन् स स्व मार्गं प्रति प्रस्थितः ?'

प्रीतिः स्नेह-स्वप्नेषु मग्ना एतत् सर्वं न अजानात्, यत् कदा तस्यः ग्रामः आगतः, यात्रापत्रवाहकोऽवदत्-"पञ्चगरायी" ग्रामस्य कोऽपि अस्ति, तस्य कुध्वनिं श्रुत्वा, सा स्वप्नात् उद्बुद्धा इव मोटरयानात् अवातरत्। तस्या माता तत्रैव अमिलत्। तया सह गृहं प्रत्यागच्छत्।

संतोषः पत्रं तु अक्षिपत् परञ्च चिन्ता तं न त्यक्तवती। स चिन्तयति स्म यत् यदि पत्रम्, अन्यस्य कस्यचित् मनुष्यस्य हस्ते गतम् तदा किं भविष्यति। सम्भवतः प्रीतिः एव कंचित् ग्रामं प्रति गता न भवेत् एवं स चिन्ता-समुद्रस्य मध्ये पतन् आसीत्। क्षेत्रे गत्वा पित्रा सह तृणानां चयने मग्नो जातः। तस्य पिता अपि प्रतीक्षायामासीत् स संतोषं तृणानां चयनं कुर्वन्तं दृष्ट्वा प्रसन्नोऽभवत् तस्य पिता विचारयति स्म यत्

महाविद्यालये गत्वा छात्राः स्व कर्मच्युताः भवन्ति, समयं व्यर्थमेव यापयन्ति परञ्च संतोषं दृष्ट्वा तस्य हृदयं विकसितम् अभवत् । संतोषेण सकलानि तृणानि एकत्रीकृत्य प्रज्वलितानि यत् तृणानि पुनः न विकसितानि भवेयुः । हेपितः, 'अहं गृहं गच्छामि' इति उक्त्वा स गृहं प्रति अगच्छत् गृहे आगत्य, स स्व मुखं हस्तौ च प्रक्षालयत् तदैव पत्रवाहकः तमकथयत्-"पाठक ! तव पत्रम्"। स स्व पत्रम् जग्राह प्रतिज्ञाय स्व हृदयेन सह स्पर्श चकार। स स्व मृत्तिका-प्रकोष्ठे अगच्छत् यत्र स मधुच्छि- वृत्या सह पठति स्म, स्व देवस्य पूजां च करोति स्म। पत्रमुदघाटयत् पठितुं च आरभत ।

मम प्राणप्रिय प्रियतम !

प्रेम्णा ...–........–

पत्रं प्राप्तम्। तत्र अश्रूणि एव अमिलन्। मम अश्रूणि अपि तैः सह अमिलन् । अहं प्रसन्नाऽभवम् यत् मम अश्रूणि अपि तव अश्रूणि जानन्ति । सकला रात्रिः अश्रुभिः सह गता प्रातरेव यदाहं रंजीतायाः समीपे अगच्छम् यया मह्य , स्नेह-पूर्णान् द्वित्रिशब्दान् लिखितुं प्ररेणा दत्ता आसीत् । भवता सह कृतां प्रतिज्ञां पूर्णां कर्तुं समर्था न जाता अतः क्षम्यताम्।

भवतः हृदयस्य ध्वनिः

"कर्मजोत कौर" प्रीतिः

पत्रं पठित्वा संतोषः स्व द्विचक्रिकां नीत्वा निज आनन्दं दर्शयितुं रघुवीरं प्रति अचलत् सर्वां कथां तम् अवदत् परञ्च

 प्रीतिः

समीपस्थ - समाचारपत्रं पठित्वा तस्य मनः व्याकुलमभवत् यत् "बी. ए. भाग द्वितीयस्य परिणामः. श्वः समाचार-पत्रे प्रकाशितो भविष्यति"। सोऽचिन्तयत् -"अस्मिन् वर्षे अपि स शोभनान् अंकान् नीत्वा उत्तीर्णः भविष्यति ।" 'कथं निराशोऽभवः' रघुवीरः तस्य मुखं दृष्ट्वा अकथयंत् ? 'श्वः परिणाम आगमिष्यति, अतः हृदये चिन्ता वर्तते'।

'चिन्ता। साऽपि त्वाम्। चिन्ता तु मादृशान् छात्रान् भवति ये अष्टम - कक्षामपि उत्तिर्णां न कर्तुं समर्थाः भवेयुः रघुवीरः संतोषम् आलिङ्ग्य अकथयत्।'

सकला रात्रिः संतोषेन नेत्रयोः एव व्यतीता यतः तस्य वर्षं यावत्-परिश्रमं प्रातरेव फलीभूतं भविष्यति। प्रातः यदा सूर्यः दृष्टिगोचरोऽभवत् तदैव चायपानं कृत्वा भाईरूपा नगरं प्रति अचलत्, यतः भाईरूपा नगरे एव समाचार पत्रं शीघ्रम् आगच्छति स्म, तत्पश्चात् तस्य नगरे। स स्व मित्रं नीत्वा मोटरयानालयं प्रति अगच्छत्। अष्टवादनवेलायां हाई वे—मोटरयानं समाचारपत्राणां मञ्जूषां नीत्वा आगतम्। मञ्जूषां दृष्ट्वा संतोषस्य हृदयं अकम्पत समाचारपत्र - विक्रेता मञ्जूषांमुघाटयत्। रघुवीरेण झटिति समाचार पत्रं गृहीतम्। समाचार पत्रे स्व परिणामं पठित्वा संतोषः प्रफुल्लितोऽभवत् यत्-सम्प्रति स एव 'प्रथम' इति निर्दिष्टोऽभूत्। प्रीतिः तु द्वितीय स्थानं प्राप्तवती रघुवीरोऽपि प्रसन्नो जातः। तौ रामपुरा फल नगरं प्रति अगच्छताम्। कृष्ण नामक चलचित्र-गृहे 'पत्थर के

प्रीतिः

सनम' इति चलचित्रमपश्यताम् । यदा संतोषः गृहम् आगतः, तदा स्व पितुः पादयोः स्पर्शं कृत्वा स्व प्रसन्नतामप्रकटयत् । पिता तु परिणामं श्रुत्वा आनन्दमग्नो जातः प्रतिवेशिनोऽपि तस्मै 'प्रशसा-शब्दान्' कथयन्ति स्म । रात्रौ संतोषस्य विषये वार्ता कुर्वन् एषः लघु-परिवारः निद्रां प्राप्तः ।

तत्र प्रीत्या जनकः समाचार पत्रं पठित्वा अवदत्- "प्रीते! तव परिणाम आगतः, कः क्रमांकः वर्तते, शीघ्रं वद ? प्रीतिः शीघ्रमेव पितुः पार्श्वे आगता । स्व क्रमांकमकथयत् , परञ्च तस्य हृदये तु कौतुहलम् आसीत् यत् कदा सा संतोषस्य परिणामं पश्यतु । सा चिन्ता समुद्रे एव आसीत् यदा तस्याः पित्रा उक्तम्; मिष्टान्नम् आनय , विश्वविद्यालये द्वितीय-स्थानं प्राप्तवती, एकः बालकोऽस्ति संतोषः, यः प्रथम आगतः । संतोषस्य नाम श्रुत्वा प्रीतिः अति-प्रसन्ना जाता अवदत् च, अयं विनम्रः छात्रो मम कक्षायामेव पठति । गतवर्षे अपि प्रथम इति निर्दिष्टोऽभूत् । प्रीत्या वचनानि श्रुत्बा तस्य पितुः हृदये संतोषं प्रति स्नेहं उत्पन्नम् । सोऽचिन्तयत्-"यदि मम प्रीतेः कृते संतोष-सदृश एव बालकः ... ...।"



{ ५ }

जुलाई - मासस्य अष्टादश - तिथिरासीत् । मन्दं मन्दं वर्षति स्म वर्षा, धीर-समीर-वायुः चलति स्म वृक्षेषु पतङ्ग -कुलाः कूजन्ति स्म, प्रत्येक ईश्वराय धन्यवादान् वितरति स्म यत् अद्य तु देवः 'शिमलां' अत्रैव स्थापयमास। अस्मिन् मोहिते समये संतोषः मोटरयानलये प्रतीक्षते स्म, यतः अद्य तौ प्रवेशार्थं समयं निश्चितवन्तौ । सः प्रतीक्षायां विह्वलोऽभवत्, परं प्रतीक्षायां रत आसीत्। तस्य हृदयो वदति स्म यत् सा अवश्यमेव आगमिष्यति । अन्ततः प्रतीक्षा-घटिका समाप्ता । सा मोटरयानात् अवातरत् । इतस्ततः दृष्टिमक्षिपत् , सतोषः दृष्टिपथे आगतः । नेत्रे अमिलताम् । प्रफुल्लितौ जातौ । ईषद-स्मित-मुखस्य लालिमा द्विगुणा जाता, प्रेम्णि वार्तां कुर्वन्तौ तौ महाविद्यालये प्राप्तवन्तौ। यदा तौ द्वारे एव आस्ताम् तदा तयोः 'स्वागतम्' हुकम-सिंहेन कृतम् । एकोऽवदत्-"रे भ्रातः! जीवनं तु अस्यैव वर्तते । वर्षं यावत् प्रेम-दोलायाम् अदोलयत् पुनः उत्तीर्णोऽपि जातः" द्वितीयोऽकथयत्- "नहि जार! भाग्यं तु अस्माकमेव यतः वयं एकां परीक्षामुत्तीर्णां कर्तुं पञ्चवर्षीय- योजनां स्थापितवन्तः। संश्रुत्य सर्वे अहसन् , हुकमसिंहः संतोषण सह हस्तमेलनमकरोत् , परं चौर-नेत्राभ्यां पश्यति स्म। संतोषः शीघ्रमेव कार्यालयं प्रति तया सह अचलत् । प्राचार्यः प्रध्यापकाश्च तयोः स्वागतं चक्रुः। प्राचार्यः अकथयत्-"अद्य तु अस्माकं देशायं इदृशानां बालकानां बालिकानां च आवश्यकता वर्तते । यदि सर्वे त्वादृशाः एव भवेयुः तदा अस्माकं देशः रूस- अम्रीका- जापान- देशानां अग्रणी भविष्यति ।"

प्रीतिः

महाविद्यालयस्य शुल्कं दत्त्व स्व स्व ग्रामं प्रति गन्तुं परस्परं कथयतः स्म परं तयोः रागः गन्तुमाज्ञां न ददाति स्म यतः पावन-प्रेम आसीत्। पावन प्रेम सदैव वासनाया दूरं भवति। पावन-प्रेम तु ईश्वर एव वर्तते। अद्यत्वे तु प्रणयो वासनाया बुभुक्षितोऽस्ति। तौ वासनाया दूरमास्ताम्। तयोः मनसी प्रेम पूर्णे आस्ताम्, प्रेम-कारणाद् तौ उत्कूर्दतः स्म। प्रेम उत्पेक्षणं शमनं कर्तुं दशहरा-क्षेत्रे एकस्मिन् कोणे स्नेह वार्तासु मग्नौ जातौ। तौ न अवित्ताम् यतः कदा रञ्जीता तत्र आगत्य तयोः वार्ताम् अश्रृणोत्। यदा गन्तुमुदतिष्ठतः तदा रञ्जीतां दृष्ट्वा चकितौ अभवताम्। रञ्जीतया उपहासेनोक्तम् "रे प्रीते। अधुना मां विना अत्रैव आगता, अहं तु मधु-मक्षिका इव तव मार्गं गवेषयन्ती तव पार्श्वे आगता।" 'रञ्जीते! नहि, एषा वार्ता न वर्तते, अधुना तव समीपे एव आगमनाय उद्यता आमम् संतोष; भवानपि चलतु।' 'नहि रञ्जीते। पुनः कदापि आगमिष्यामि, इति कथयित्वा स मोटरयानालयं प्रत्यागच्छत्,' यदा चतुष्पथे आगतः तदा हुकमसिहस्य मित्राणि तं परितः अतिष्ठन्। तेषु एकः नव निर्मित-सखा संतोषस्य कण्ठे स्व हस्तौ-क्षिप्त्वा अवदत्-हुकम-सिहस्य मार्गं त्यज अन्यथा ... ...। तदा चतुष्पथे तिष्ठन् राजपुरुषः अवालोकत् स धावयित्वा तत्रागतः परं चण्डाल-समूहः तत्रागमनात् पूर्वं पलायितः परं राजपुरुषः मोटरयांनालयं यावत् तेन सहागतः।

प्रीतिः रञ्जीता च यदा गृहे प्राप्तवत्यौ, तदा रञ्जीतायाः

प्रीतिः

माता भोजनमपाचयत् ! ते मातुः समीपे एव उपविश्य भोजनं कृत्वा, मातुराशीर्वादं प्राप्य प्रीतिः स्व ग्रामं प्रति गन्तुमाज्ञामयाचत् । माता रञ्जीतां प्राह ''रञ्जीते ! त्वं मोटरयान – स्थानं यावत् प्रीत्या सह गच्छ ।'' 'आम् तया सह गच्छामि' । ते मोटरयानालये प्राप्तवत्यौ प्रीत्या मोटरयानमागतम् । शीघ्रमेव आरूह्य सीटमेकां गृहीतवती । रञ्जीताऽपि 'शिवास्ते पन्थानः सन्तु' इत्युक्त्वा स्व गृहं प्रत्यागच्छत् ।

प्रीतिः मार्गे निश्चयमकरोत् यत् सा अद्य मात्रा सह वार्ताम् अवश्यमेव करिष्यति यदा रात्रिः जाता, सा आह,- 'मातः ! त्वया सह स्वप्स्यामि ।'' 'नहि, सुते । स्व प्रकोष्ठे एव स्वपतु ।, परं सा बलपूर्वकमेव मात्रा सह अस्वपत् । तस्याः मुखम् उपहासपूर्ण-वार्तां च श्रुत्वा तस्याः जननी ''अवदत्-का वार्ता, अद्य अतीव हर्षं वर्तते ?'' वार्ता तु कापि न, परं महत्तरापि वर्तते । किं, शीघ्रमेव वद ? मम चेतः व्याकुलं भवति । प्रीतिः स्व वार्तां कर्तुं मिच्छति परं मुखे आगत्य अवरोधं भवति स्म । अन्ते रूद्ध-कण्ठेनोक्तम् ''जननि । मम वाग्दानं मया सह वार्तां कृत्वा एव करणीयम् ।'' प्रीत्या वार्तया सा चकिता जाता तया धैर्येणोक्तम्- ''पुत्रि ! का वार्ता कृता ? तव परामर्शेन एव सर्वं भविष्यति । आवां स्व समयेन-सह न चलिष्यावः । चिन्तां त्यज ! त्वया इच्छित-बालकेन सह विवाहं करिष्यावः । मम मनः साक्ष्यं ददाति यत् त्वया स्व वरः लब्धः, मां कथय, तव पित्रा सह अपि वार्तां करिष्यामि । 'मातः । तं बालकं तु पिता जानाति । ह्यः समाचार-

पत्रे तस्य चित्रमासीत् तस्य विषयेऽपि अपृच्छत्। साधु यद्येवं तर्हि प्रातः काले एव तव पित्रा सह वार्तां करिष्यामि।

प्रातः काले यदा एव प्रीत्याः माता 'गुरुनाम कौर' इति नामका तस्याः पिता ग्रामाध्यक्ष-अमरसिंहं प्राह-'अद्य भवता सह आवश्यकं कार्यं वर्तते'। श्रुत्वा, स चकितोऽभवत्-'न जाने अद्य मम प्राणप्रियां मया सह किं कार्यं भवितुं शक्नोति।' सोऽवदत्-'अहं शीघ्रमेव हरदेवस्य स्थानस्य संधानं कारयित्वा आगच्छामि।' 'इतोऽपि सन्धानं कर्तुं भवता सह योगस्यापेक्षा वर्तते'। आकर्ण्य अमरसिंहः बहिरागच्छत्।

हरदेवसिंहस्य स्थानस्य सन्धिं कारयित्वा यदा ग्रामाध्यक्षः गृहम् आगतः तदा "गुरूनाम कौर" चायं करोति स्म। चायपानं कृत्वा यदा ग्रामाध्यक्षः स्व प्रकोष्ठे समागतः तदैव साऽपि आगता दृष्ट्वा एव सोऽवदत्-"मम प्राणप्रिये! मया सह किं सन्धानं कर्तुमिच्छति"। 'सन्धानं कर्तुं चेतः कठोरं कुरु। भवतः ग्रामाध्यक्षतायाः अधुना ज्ञानं भविष्यति।' 'पूर्वं वद, लोकोक्त्या मा कथय।' 'श्रूयताम् भवतः लालिता बालिका स्वयमेव वरं लब्धवती।' 'तर्हि किं जातम्, सुन्दरं कृतम्, परं बालकः कः अस्ति?' 'भवान् जानाति एव।' 'अहं जानामि।' 'अद्य उपहासस्य शिक्षा कुतः शिक्षिता?' 'उपहासं न ममदेव, इदं सत्यं यस्य बालकस्य परिणामविषये भवान् प्रीतिमकथयत्, स एव बालकोऽस्ति।' आवयोः सुतायाः "निर्वाचनम् तु प्रशंसायोग्यं" वर्तते। तस्मिन् समये मम चेतोऽपि

प्रीतिः

कथयति स्म यदि मम प्रीतेः कृते ईदृशः बालकः प्राप्येत् तदा अहं देवाय शतशः धन्यवादान् दास्यामि ।' 'यदि गृहं श्रेष्ठं स्यात् तर्हि वाग्दानं क्रियताम् ।' 'त्यज श्रेष्ठं, अश्रेष्ठंच या सुतायाः इच्छा सा आवयोः। सुत - सदृशः आवयोः बालिका । यदि आवां तस्याः इच्छां पूरयितुं नशक्नुयाव तदा आवयोः आत्मा शान्तिं न एष्यति । यदि बालकः श्रेष्ठो वर्तते ।, तर्हि सर्वमेव श्रेष्ठं भवति । यदि गृहं श्रेष्ठं स्यात्, परं बालकः सुरापायी भवेत् तर्हि बालकश्चूल्यामेव पतेत नाम । शेषम् प्रीतिः अपि कुशलतमा वर्तते। शोभनं तस्याः निर्वाचनम्, श्रेष्ठमेव भविष्यति । अधुना तस्य माता पिता च सह वार्ता कर्तुं समयो निर्धारणीयः, इति कथयन् अमरसिंहः गरीब सिंहस्य कथनेन क्षेत्रं प्रति अचलत् ।



६

प्रीतिः भूयोऽपि महाविद्यालये प्रत्यागता। सर्वा एव स्व स्व सखीभिः सह मेलनं कुर्वन्ति स्म। वार्तासु मत्ता आसन्। प्रत्येक - छात्रस्य छात्रायाश्च मुखं पुष्पमिव विकसितम् आसीत्।

अस्मिन् शोभने समये यदि कोऽपि छात्रः, आशाहीन आसीत् तर्हि स तु संतोषः, यतो हुकम सिंहात् स बिभेति स्म। प्रीतिः कतिपय वारम् अपृच्छत् परञ्च स किमपि न कथयमास। प्रीतिः अवदत् - "यदि काऽपि वार्ता नास्ति तर्हि मनः किमर्थम् उदासीनं वर्तते ?" 'अद्य तु अहम् एकां वार्तां वक्तुम् अभिलषामि' "वद" "पूर्वमेव हृदयं कठोरं कुरु।' मम हृदयं तु कठोरमेव।' आम् जुबली-उपवने गच्छावः।'

तौ उपवने अगच्छताम्। प्रणय- वार्तासु मग्नौ जातौ। यस्य कार्यस्य कृते अगच्छताम् तद् विस्मृतम्। 'वार्ता कथय, संतोषोऽवदत्।' 'शीघ्रमेव न कथयिष्यामि। उत्कटेच्छा-भूते सति कथयिष्यामि' 'तवेच्छा। स्त्रीणाम् राज्यम्। परञ्च स्मर, मम मनसि दुःखं न भविष्यति।' त्वमेव क्लेशमनुभविष्यति यथा चोक्तम्- "मम मित्रस्य नेत्रे पीडिते परञ्च रक्तिमा तु मम नेत्रे वर्तते।" यद्येवं तर्हि

प्रीतिः

श्रृणु:- प्रीतिः स्वमात्रा सह कृतां सकलां वार्ता कथयमास स्व शिरश्च संतोषस्य स्कन्धे आरोपयत् । परञ्च युवकान् दृष्ट्वा लज्जिता जाता । सत्वरमुत्थाय, महाविद्यालयं प्रत्यागच्छताम् ।

अन्तिम-घण्टिकायां पठित्वा यदा तौ पण्यभोजनालयस्य समीपे आगच्छताम् तदा एषा ध्वनिः कर्णपथे अपतत् 'एषः दुष्टोऽस्याः संगं न त्यजति। चतुष्पथे दत्तं तर्जनं न स्मरति।" 'किमर्थं चतुष्पथ- तर्जनस्य" ? आम् प्रीते ! संतोषेण सकला घटना कथिता।'

प्रीतेः नेत्रे रक्ते जाते। यदा सा पण्यभोजनालयं प्रति अपश्यत् , तदा हुकमसिंहः चायपानस्य स्थाने सुरां पिबति स्म। प्रीतिं निज-प्रति आगच्छन्तीं दृष्ट्वा सोऽवदत् 'रे सोहन ! एषा सा सुन्दरी यां पाशे पाशंयितुमिच्छामि ." यद्येवं तर्हि अधुना एव स्व कर्तव्यं दर्शयामि। अधुना पश्यन्तु सोहनस्य हस्तौ।'

यदा सा समीपमागता, तदा सोऽकथयत् "अद्य,, तु त्वां विना मनः न लगति।" परञ्च शब्दाः तस्य मुखे एव आसन् यदा प्रीतिः तस्य मुखे करतल प्रहारं कृतवती। यदा पुनः द्रष्टुं ऐच्छत् तदा स्व पुस्तकेन प्रहारं कृतवती। हुकमसिंहः पश्यति स्म, भीत्वा एव तत्रत पलायनं चकार, परञ्च सोहन सिंहस्य सुताडनं जातम्।

प्रीतिः

यदा सोहन सिंहः हुकम सिंहं तत्र न अवलोकयत् तदा तस्य हृदये क्रोधस्य ज्वाला स्फुटिता। तेनोक्तम्- "दुष्टहुकमसिंह! त्वं मम सहायतां न अकरोः। अधुना द्रक्ष्यामि, केनप्रकारेण, स्व प्रभावं दर्शयिष्यसि"

तस्य चेतसि घृणा उत्पन्ना। दुष्टतां व्यक्तुं निश्चयं चकार। आगामिनि दिवसे एव प्रीतिं स्व भगिनीं मत्वा क्षमायाचनामकरोत्। प्रीतिः अपि अक्षमत् परञ्च अवदत्-"अस्य पावन सम्बन्धस्य निर्वाहमति कठोरम्।" 'चिन्तां मा कुरु, प्राणान् त्यक्त्वा अपि अस्य सम्बन्धस्य रक्षां करिष्यामि।'

सम्प्रति संतोषः प्रीत्या सह विचरति स्म। प्रेम वार्ताभिः सह पठन-वार्ताम् अपि कुरुतः स्म। प्रीतेः धर्मभ्राता सोहनोऽपि संतोषस्य मित्रमभवत्। स अधुना पठनेऽपि कुशलो जातः। गृहपरीक्षायां स चतुर्थ-स्थानं प्राप्तवान्। स चिन्तयति स्म-प्रीतेः करतलप्रहारेण एव तस्य जीवन-नौका, रक्षिता सफला च जाता।"

हुकम सिंहः सोहनाय क्रुध्यति स्म। स इच्छति स्म यदि तस्य वशे किमपि भवेत् तर्हि सोहन सिंहं स्वर्गं प्रेषयतु परञ्च स सोहनस्य मुष्टिप्रहारात् बिभेति स्म हृदयस्य आभ्यन्तरे एव विषं पिबति स्म।

प्रीतिः

यदा छात्रसंघस्य निर्वाचनम् अभवत् तदा हुकमसिंहः पराजयस्य मुखमवलोकयत् । एषः पराजयः तम् अत्यधिकं दुष्टं कृतवान् । सम्प्रति स बालिकाभ्यः कुशब्दान् वक्तुं न बिभेति स्म ।

एकदा किं जातम्, लता नामका ग्राम-बालिका, या समीपस्थ-नंगल- ग्रामाद् आगच्छति स्म, तां स्व वासनाया पूर्त्यै हस्तगतां कर्तुं मैच्छत् । तेन फरीदकोट मण्डलस्य नंगल-ग्रामस्य मध्ये स्थिते आरण्ये सा परिवेष्टिता । सा तस्य नरवरात् रक्षायै प्रायतत ।, परञ्च तस्य चाण्डालस्याग्रे तस्याः अबलायाः बलं कार्यं कर्तुमसमर्थं जातम् । परञ्च यस्य ईश्वरः सहायकः स्यात् तस्य कोऽपि अशुभं कर्तुं न शक्नोति । अतः तस्माद् कालादेव तस्य ग्रामस्य युवकः प्रतापसिंहः तत्र आगतः । तस्याः सम्मानमरक्षत् । परञ्च पापी तस्या वसनानि विदारयत् । प्रताप सिंहः स्वशिरोवेष्टनं तस्या अङ्गानां आच्छादनाय अददात् । स पलायनं कर्तुं सफलोऽभवत् ।

आगामी दिवसे एव प्रताप-सिंहः, यः कक्षायाः 'सी आर' (कक्षा-सचिवः) इति आसीत् , प्रधानाचार्यस्य कार्यालये गत्वा सर्वां वार्तां कथितवान् प्रधानाचार्योऽपि हुकमसिंहाद् बिभेति स्म परञ्च प्रतापसिंहस्याग्रे सोऽपि नम्रोऽभवत् । घण्टिका वादिता । भृत्य आगतः तं हुकमसिंहम् आकारणाय प्रेषयत् । सः पण्यभोजनालये चायपानं कुर्वन्तं हुकमसिंहं प्राह- "हुकमसिंह !

प्रधानाचार्यः त्वाम् आकारयति"। स प्रत्यवदत्- अहं चायपानं करोमि, मम पार्श्वे समयो न वर्तते। यदा समयो भविष्यति तदा साक्षात्कारं करिष्यामि।" भृत्यो मौनं भूत्वा प्रत्यागच्छत्।

प्रतापसिंहः कार्यालायाद् छात्रसंघाध्यक्षस्य समीपे गतः। सर्वां वार्तामकथयत्। अध्यक्षो गुरचरनसिंहः तेन सह कार्यालये आगतः 'श्रीमन्, किमधिराज आगतः, प्रतापसिंहः हसन् प्राह।' "पुत्र ! अधुना अहं किं कुर्याम् सः महाविद्यालयस्य अनुशासनं भङ्गं करोति। कस्यापि आदेशं न मानयति"। 'यदि नहि मन्यते, तदा महाविद्यालयाद् निष्कासयतु'।

गुरचरनसिंहः क्रोधे आगत्य, स्वाध्यक्षतायाः बलं दर्शयितुमकथयत् "आम्, निष्कासयतु, यदि काऽपि दुष्टता कृता, वयं रक्षणं करिष्यामः। अद्य अस्या बालिकाया उपरि हस्तौ अक्षिपत्, श्वः कस्याः अपि बालिकायाबल-पूर्वकं निरादरं करिष्यति पूर्वमेव बालिकाः तस्माद् बिभ्यति'। अस्तु सर्वम् उचितं भविष्यति'। बाढम्, भवते धन्यवादः, इति कथयन्तौ कार्यालयाद् बहिर् आगतौ।

तदनन्तरं प्रधानाचार्यः, प्राध्यापकैः सह मन्त्रणां कृत्वा, लीपिकम् आकारयत्, एकम् आदेशं च लिखितुं प्राह, यस्य विषय आसीत्—"अनुशासन - भङ्गकरणाद् हुकमसिंहः महाविद्यालयाद् निःसारितः।" तदैव सूचना पट्टिका-उपरि अस्थापयत्।

प्रीतिः

प्रातः यः छात्रः सूचनां पठति स्म, स एव कथयति स्म- "साधु, साधु । चण्डालता दूरी अभवत् ।" यदा हुकम सिंहः सूचना-विषये अश्रृणोत् तदा स चैतन्यहीनोऽभवत् । क्रोधे आगत्य प्रधानाचार्य-समीपे प्राप्तः ।

प्रधानाचार्यः तं दृष्ट्वा प्राह- 'यदि महाविद्यालयस्य सीमातः दूरं न गमिष्यसि तर्हि रक्षापुरुषान् सूचयिष्यामि ।' क्रोधे एव स्व पितुः समीपे गत्वा सकल-वृतान्तं कथयमास । स स्व फीयट -मोटरयानं निष्कासयत् महाविद्यालयं प्रति च अचलत् ।

प्रधानाचार्येण तस्य पितुः सत्कारः कृतः यदा स हुकमसिंहस्य विषये वार्ता कृतवान् तदैव प्रधानाचार्यः अकथयत्-"बघेलसिंह ! अहं लज्जितोऽस्मि यत् स भवतः सुतः वर्तते परमहं तं महाविद्यालये पुनः प्रवेशं दातुं न शक्नोमि । महाविद्यालयस्य कोऽपि प्रध्यापकः, छात्रा छात्रा च तं नेच्छति, प्रधानाचार्यः सकलां वार्ताम् अवदत् ।"

प्रधानाचार्यस्य वार्ता श्रुत्वा बघेलसिंहः अहसत् अवदत च-"श्रीमन् प्रधानाचार्य ! यदि अस्माकं 'बालकाः दुष्टतां न करिष्यन्ति तदा केषां करिष्यन्ति । अस्यार्थस्तु इत्थमभवत् यत मम बालकेन सह अन्यायोऽभवत् ।" प्रधानाचार्यः क्रोधेऽवदत्- "बाढम्, अधुना कार्यालयाद् बहिः भवतु ।" अन्यथा किं श्रीमन् प्रधानाचार्य । यो भवान् कर्तुमिच्छति तत् कृतम् । अहं

प्रीति।

मम लालित-पुत्रं पटियाला नगरे प्रवेशं कारयिष्यामि. परञ्च इदं वाणिज्यं महामूल्यं भविष्यति भवतः कृते ।" 'बहुमूल्य-मल्पमूल्यं वा भवेत्, कार्यालयाद् बहिः भवतु ? प्रधाना चार्यस्य शब्दाः मुखे एव आसन् तदैव स कार्यालयाद् निगत ।

तदनन्तरं यदा प्रधानाचार्यः महाविद्यालयस्य गुरुतेगबहादुर- उपवनस्य कोणे तिष्ठति स्म तदा छात्रसघाध्यक्षः तत्रागतः । प्रधानाचार्यः सकल-वृतान्तं वर्णितवान् । श्रुत्वा, तेनोक्तम् "भवान् चिन्तां मा कुरु, यतः श्वानः बुक्कन्ति ।"

प्रधानाचार्योऽवदत् – "न काऽपि चिन्ता, यतः मम महाविद्यायस्य छात्रसघः छात्र हितार्थं कार्यं करोति, कार्यावरोधं न करोति ।" श्रीमन्, प्रधानाचार्य ! भवतः आर्शीवादस्य फलमेतत्, इति कथयित्वा छात्रसंघाध्यक्षः तस्मात् स्थानात् गतः ।

हुकमसिंहस्य महाविद्यालयाद् निर्गते सति, महाविद्यालये शान्ति जाता । छात्राः छात्रसंघाध्यक्षस्य प्रशंसां कुर्वन्ति स्म । तस्य एव सत्कारं दिक्षु वितनोति स्म । संतोषेण सह तस्य मैत्री जाता । सतोषः स्व सम्बन्धे घटितां कथां तस्मै निवेदितवान् । श्रुत्वा, स क्रोधे आगतः । सोऽकथयत् – "पूर्वमेव कथं न अकथयः ? अहं तं मृत्यु-गृहे प्रैषयम् ।"

तदैव प्रीतिः आगत्य अवदत्–"कं प्रेषयसि मृत्युमुखे ?

किमधुना आवां महाविद्यालयाद् निष्कासयितुमिच्छसि ।" 'न हि सम्प्रति तु तव निर्गमनं न, अपितु त्वां स्थिरी करिष्यामि । अधुना अहं गच्छामि यतः त्रिकर्णपथे पतिता वार्ता विस्तारं प्राप्नोति, रहस्य-वार्ता तु द्वयोः मध्ये एव भवति ।'

श्रीमन् मम पाठक । इदानीं प्रणय-कथां कथयतु । हुकम सिंहोऽपि निर्जगाम । व्यथां त्यजतु ।' प्रीतेः व्यथा न पूर्वमासीत् न अधुना परं या चिन्ता मां बाधते तां प्रकटयितुं न शक्नोमि ? 'का चिन्ता ? शीघ्रमेव वदतु ।' 'अहं वक्तुं न समर्थोऽस्मि, 'एवं न भविष्यति । यदि न कथयिष्यति तर्हि शपथं गृह्णामि ।' 'प्रीते, प्रणय- शपथं प्रति-निवर्तय ।' 'शपथमपि कदाचित् निवृत्तम् ?

यद्येवं तर्हि श्रृणु-क्रोधं मा कुरु निर्धनता नरे महत्तमं कलंकं वर्तते । ईश्वरः निर्धनं संसारे मा प्रेषयतु । निर्धनाय सर्वे सेवक इव आचरन्ति । धनिकं तु सर्वे एव नमन्ति, चेत् स चाण्डालोऽपि एव स्यात् । निर्धनतायाः कुलीनतायाः च भेदस्य समाप्तिः कदापि न भविष्यति ।

अलम्, भो अलम्, दर्शनशास्त्रं त्यजतु, जानामि, दर्शन-शास्त्रे शोभना अंकाः लब्धाः । अतः कार्यस्य कथां कथयतु । कार्यस्य कथा, त्वं स्वयमेव ज्ञास्यसि यत् अहं निर्धन-गृहस्य छात्रोऽस्मि त्वं च कुलीन-कुलस्य प्रधान-भूमिपत्युः च बालिका । एषा व्यथा

मां पीडयति , मम बुलबले !' 'कुलीनता निर्धनता च आवयोः प्रणय-मध्ये भित्तिः न भवेत् , मे चन्द्र ! अहं भित्ति त्रोटयिष्यामि मातरं पितरं च कथयिष्यामि यत् अहं संतोषेण सह परिणयं करिष्यामि अन्यथा ... ... ।' सहसा एव तस्याः नेत्रयोः अश्रूणि आगतानि । जल प्रवाह इव अश्रूणि न रुन्धते स्म ।

अन्ते संतोषोऽवदत् - "अधुना चिन्तां त्यक्ष्यामि, मम सर्वकार ! रोदनं त्यज, प्रणयस्य वार्ता कुरु ।" 'किम्, संतोष ! भवान् मम प्रणये न विश्वसिति, प्रीतिः अवदत् ।' 'दृढ-विश्वासः, मम प्राणाप्रिये ! सम्प्रति प्रणय कथां कथय रोदने न किमपि प्राप्स्यति' । 'आम् सतोष ! परश्वः आवयोः परीक्षा प्रारब्धा भविष्यति । अतः श्वः पूजास्थले गन्तुमिच्छामि ।' अति सुन्दरम् , अहमपि आगमिष्यामि ।' अधुना चलावः ।

७

सोमवासरे सप्त-वादन -वेलायां प्रीतिः प्रसादं नीत्वा घण्टागृहस्य समीपे गान्धि-उपवने तिष्ठन्ती संतोषस्य प्रतीक्षां करोति स्म। अर्धसप्तवादन-वेलायां संतोष आगतः। उपवने समक्षे एव पूजास्थलम् आसीत्। सतोषं दृष्ट्वा सा पूजास्थलस्य द्वारे आगच्छत्। हस्तौ पादौ च प्रक्षाल्य ईश्वरालये गतौ। प्रसादं दत्वा स्व मनोकामनां पूर्णां मन्यमानौ, परिकर्म-कर्तुं प्रारब्धवन्तौ।

तत्र प्रीतिः संतोषस्य कर्णे उक्तवती-"अत्र ईश्वरस्यालये भवन्तं स्व पतिरुपेण स्वीकरोमि यदि काऽपि आपत्तिः तर्हि वदतु।" 'न काऽपि आपत्तिः। अहमपि ईश्वरात् त्वाम् अयाचम्।'

परीक्षा प्रारब्धा समाप्ता च। तौ अन्तिम- दिवसे व्याकुलौ आस्ताम्। तयोः ग्रामयोरपि अत्यधिकमन्तरमासीत्। अतस्तयोः मनः गन्तुं स्वीकृतिं न प्रयच्छति स्म।

अन्तिम-पत्रमासीत्। प्रीतिः निज प्रकोष्ठे स्व प्रियतम-विषये चिन्तयति स्म। तदैव रञ्जीता आगत्य अकथयत्-"तव पत्रम् आगतम्; पत्रमञ्जूषायाम्, अलम्, तव दार्शनिकया प्रकृत्या।" सा कस्यचित् प्रतीक्षायां व्याकुलतां अनुभवति स्म।

प्रीतिः पत्रं नीत्वा उद्घाटयितुं यत्नं कर्तुं मग्ना जाता।

प्रीतिः

यथा यथा सा पत्रं पठति स्म तथा तथा तस्या मुखं प्रफुल्लितं भवति स्म । 'किमन्यस्य जारस्य पत्रं वर्तते, यतोऽत्यधिक- प्रसन्ना दृश्यते रञ्जीतया उपहासेनोक्तम् ।' "नहि रञ्जीते ! पितुः पत्रं वर्तते तेन लिखितम् "यदा परीक्षा समाप्ता स्यात् तदा सतोषेण सहैव आगन्तव्यः, परं स न जानीयात् ।"

पत्रं पठित्वा सा संतोषं समया प्राप्ता, यो ग्रामं गन्तुं स्व वस्तूनि एकत्रो करोति स्म । गत्वा एव सा प्राह -'संतोष । अद्य भवान् मया सह मम ग्रामं प्रति चलतु " 'किम् तव ग्रामं प्रति ? संतोष आश्चर्यचकितो भूत्वा अकथयत् ।' "आम्, संतोष ! अहं स्व वस्तूनां रक्षणे अक्षमाऽस्मि । शेषम्, भवन्तं माता पिता चापि द्रक्ष्यतः । सम्भवतः माता पित्रा सह वार्ताम् अपि कुर्यात् ।' संतोषः क्षणं यावत् अचिन्तयत् अवदत् च-"यदि तव मात्रा पित्रा च काऽपि आपत्तिः स्थापिता स्यात् ।" 'तर्हि प्रत्यागच्छतु ।' अहं न गमिष्यामि । त्वया सह गत्वा वस्तूनि मोटरयानस्योपरि स्थापयिष्यामि ग्रामे आगते सति पितृव्यः पितामहो वा अवतारयिष्यति ।' 'नहि संतोष । भवान् क्रोधं मा करोतु । न कोऽपि आपत्तिं करिष्यति । अतः स्व प्रकोष्ठं पिधाय मया सह चलतु ।'

संतोष कम्पमान-हृदयेन तया सह अचलत् सायंकाले त्रि-वादनवेलायां तौ तस्या ग्रामे प्राप्तवन्तौ ! यदा तौ गृहे गतौ तदा तस्या जननी स्त्रीभिः सह वार्तासु मग्ना आसीत् । सा तौ दूरात् अपश्यत् । स्व सुतया सह आगन्तं बालकं दृष्ट्वा सा

प्रीतिः

ज्ञातवती यदयं संतोषोऽस्ति । सा उत्थाय, गृहं प्रति अचलत् । अपराः स्त्रियः परस्परं वक्तुं समारब्धाः यद् अस्या पुत्र्या सह स बालकः क आसीत् ! 'सम्बन्धो भविष्यति एका अवदत् ।' 'नहि सुशीले ! सम्बन्धी न, सम्बन्धिनो वयं जानीमः, 'द्विदले किञ्चिदपि कृष्णः प्रतीयते ।' 'नो ललिते ! न ईदशा बालिका' 'अलम्, नगरेषु गत्वा सर्वे विक्रियन्ते' । तदनन्तरं सर्वाः स्वगृहं प्रतिगताः ।

गुरुनाम-कौरः यदि गृहं प्राप्ता तर्हि संतोषसिंहः तस्याः चरणौ संस्पृश्य आशीर्वादं प्राप्तवान् । आशीर्वादं प्राप्य स विश्रामालये स्थिते वेत्रासने उपाविशत् ।

प्रीतिः स्व मात्रे किमपि कथयितुमैच्छत् परं तस्या माता पूर्वमेव कथितवती पुत्रि ! "तव निर्वाचनं प्रकर्षेण वैशिष्ट्यम् वर्तते । अहं स्वयं भाग्यवती, यदि मम प्रीतेः कृते, ईदृश एव वरः प्राप्येत् ।" "किं प्राप्येत् ध्रुवं लप्स्ये । प्रीतिः स्व मातुः स्कन्धे अंगुलीपीडनं कुर्वन्ती आह ।" सम्प्रति अङ्गुली-पीडनमेव करिष्यसि, स्वेश्वरं चायपानार्थं न प्रक्ष्यसि ।' 'साधु, चायपानं आनयामि ।

प्रीतिः चायपानस्य स्थाने उष्ण-दुग्धे घृतम् आक्षिप्य आनयत् । प्रीतेः मुखं दृष्ट्वा संतोषेण ज्ञातं यत् अधुना न किमपि त्रासं वर्तते ।

यदा संतोषः दुग्धं पीत्वा पानपात्रम् अस्थापयत् तदैव तस्या जनकोऽपि आगतः । संतोषः तस्मै नमस्कारमकरोत् । सोऽपि संतोषाय अत्यधिक-स्नेहं चकार । संतोषः प्रसन्नोऽभवत् । 'पुत्र ! अधुना किं करिष्यति ?' 'श्रीमन् जनक ! अधुना आजीविकां प्राप्येत् इति ममेच्छा, यतः गृहस्य आर्थिक अवस्था सम्प्रति मां पठितुम् आज्ञां न ददाति ।' 'पुत्र । तवेच्छां श्रुत्वा अहं प्रसन्नोऽस्मि । पुत्रा भवेयुः त्वादृशाः, ये गृहस्थावस्थां समक्षे स्थापयन्ति । यदि मम आवश्यकता स्यात् तर्हि समयानुसारं कथयतु तव प्रत्येकमिच्छां पूर्णां करिष्यामि, इति कथयन् ग्रामाध्यक्षः प्रीतेः मातुः समीपे प्राप्तः ।

दिवसः सायंकाले परिवर्तितोऽभूत् सायंकालः रात्रौ । प्रीति चौर्यरुपेण संतोषं निकषा प्राप्ता । तौ विश्रामशालायां वार्तासु मग्नौ जातौ ।

प्रेम नेत्रहीनं भवति, इति सत्यम्, यतः तौ स्व मातरं पितरं प्रतिः ध्यानं न दत्तवन्तौ यत् तौ अपि अत्र स्तः । यदा माता पिता च तौ गवाक्षात् अपश्यताम् तदा दृष्ट्वा प्रसन्नौ अभवताम् । परं शीघ्रं प्रीत्या गवाक्ष पिहितम् ।

तदनन्तरं सा उत्थाय संतोषस्य अंके उपाविशत् । तौ प्रेम-समुद्रे निमग्नौ जातौ । सत्वरमेव तौ पादयोः ध्वनिः अशृणुताम् । झटिति सा अंकात् उत्थाय देत्रासने उपाविशत् ।

प्रीतिः

यदा अपश्यत् तदा तस्या जननी आगच्छति स्म। तया उक्तम्-"अद्य शयनस्य नेच्छा।" 'जननि! चलतु, अहमपि आगच्छामि।' प्रीतिः 'शुभा रात्रिः' इति कथयित्वा शयनार्थं गता।

प्रीतिः गत्वा एव निद्रा-व्याजं कृतवती। सा निद्रां विना एव घर्घर-रवं कर्तुं प्रारब्धवती, यतः सा जानाति स्म यत् अद्य आवयोः विषये अवश्यमेव वार्ता भविष्यति!

प्रीतिः घर्घर शब्दं श्रुत्वा, तस्या माता आह- "बालकस्तु श्रेष्ठो वर्तते मम इच्छा वर्तते यत् प्रीतेः विवाहः तेन सह कर्तुं न काऽपि हानिः।" "इच्छा तु ममापि परं स निर्धनोऽस्ति, अधुना आजीविकायै द्वारं द्वारं परिभ्रमिष्यति, इत्यधिकमशुभं वर्तते; निर्धनता भित्तिः भविष्यति। नहि अधुना निर्धनतां कुलीनतां न द्रक्ष्यावः आवां इमां भित्तिं त्रोटयिष्यावः। प्रीतेः विवाहो भविष्यति, प्रीतेः इच्छानुसारम्।" 'परं, मम प्रीतिः धनिकस्य गृहे पलिता, या निर्धनतां नापश्यत् सा तत्र गत्वा दुःखी भविष्यति।'

प्रेम्णः समक्षे निर्धनता बाधा न भवति। यदि तव प्रीतिः स्नेहं न प्राप्स्यति तदा कुलीनता कूपे गच्छेत्। प्रेम तव प्रीतेः कृते अमृत-सदृशं भविष्यति। त्वं न जानासि निर्धनस्य हृदयं प्रेम-रसपूर्णं भवति, धनिकस्य मोहरसपूर्णम्। यदि प्रेम रश्मि आप्तुमिच्छसि, तर्हि निर्धनात् एव मिलिष्यति। प्रीतिः एतां राशिं प्राप्त-

प्रीतिः

पती। बाढम , अहं पराजितोऽस्मि अनुरागस्याग्रे ।' अर्धरात्रिः जाता, शयितव्यम् ।

प्रीतिः तयोः वार्ताम् आकर्ण्य प्रफुल्लिता जाता। तस्याः तीव्र–इच्छा जाता यत् अधुना एव सतोषं समया गत्वा सा प्रसन्नतायाः समाचारं कथयतु परञ्च पित्र्योः भयात् न गता। अतः संतोषस्य प्रेम्णि मत्ता, मधुरेषु मधु-स्वप्नेषु निमग्ना।

८

मरीचिमालिनः प्रथमारुणराशिः संतोषाय आशा रश्मिः भूत्वा आगता । आशा-रश्मौ निर्गतायां सः प्रीतेः हस्ताभ्यां निर्मिता घृतपूर्णकरपट्टिकां खादित्वा फरीदकोट नगरं प्रत्यागच्छत् । ग्रामाध्यक्षः मोटरयानालयं यावत् त्यक्तुं तेन सह आगच्छत् परं प्रीतिः तस्य नेत्रयोः नेत्रे क्षिप्त्वा 'शिवास्ते पन्थानः सन्तु' इत्युक्त्वा किञ्चित् कालाय तत्रैव तस्थौ ।

फरीदकोट-नगरं गत्वा सः बलवीर-प्रतोलिकायां स्व वस्तूनि नीत्वा ग्रामं प्रति अगच्छत् स्वग्रामं गमनात् पूर्वमेव स स्व आह्लादं प्रकटयितुं भाई रूपा नगरे एव स्व मित्रस्य समीपे प्राप्तवान् । यतः तस्मात् नगरात् तस्य ग्रामः त्रिक्रोशमासीत् । प्रेम्णः वचनानि स्व सहोदर-तुल्याय मित्राय स्नेह-कलाल-रूपेण कथयित्वा मोटरयान-स्थाने आगत्य, बूटा सिंहस्य स्यन्दने आरुह्य स्व-ग्रामं गुमटोकलां प्रति चलितः ।

स्यन्दने उपविष्टः स विचारयमास यदि- 'मह्यं आजीविका न प्राप्ता तर्हि प्रीतिः मया सह विवाहं करिष्यति ? नहि, आजीविका अवश्यमेव लप्स्यते स्व प्रियतमां प्राप्स्यामि अहं ईश्वरस्य न किमपि अनुचितं कृतवान् । आजीविका ध्रुवं

प्रीतिः

लप्स्ये। तस्य विचार श्रृंखला अपूर्णा एव जाता यतः स्यन्दनं मोटरयान-स्थाने गत्वा अवरुद्धः तस्य। पितृव्यस्य पुत्रः जसवन्तः तं तत्रैव अमिलत्, यः तस्य वस्तूनि उत्थाय गृहं प्रति अगच्छत्।

जनकः गृहे नासीत्। अतः संतोषोऽपि जसवन्तस्य गृहात् चायपानं कृत्वा क्षेत्रं प्रति गतः।

सायंकालस्य समय आसीत्। सूर्य रक्तिमा-रञ्जितानि कृषिफलानि दृष्ट्वा तस्य मनः उदासीनं जातम् यत् 'कृषकस्य किं जीवनम् ?' वर्षं यावत् परिश्रमं करोति कृषिफलानि प्राणान् दत्वा अपि रक्षति भूयोऽपि तस्य चेतसि भयं भवति, यत् कृषिफलं सुरक्षित-रूपेण गृहे पतेत्। एवं न स्यात् यत् काऽपि ईश्वरस्य विपत्तिः अकस्माद् आपतेत्, श्रेष्ठिनः गृहे वा न गच्छेत्। अनेन प्रकारेण विचारं कुर्वन् स गृहं प्रत्यगच्छत्। भोजनं कृत्वा सत्वरमेव अस्वपत्।

गतः कालो नायाति। यः कालस्य मूल्यं न जानाति तस्य कालोऽपि मूल्यं न जानाति। ईदृशः पुरुषः जीवने सफलतां प्राप्तुं न शक्नोति।' संतोषः कालस्य मूल्यं परिज्ञातवान्, स्व प्रयत्नात् प्रच्छन्न-संस्थाया पर्यवेक्षकोऽभवत्।

अस्याः अजीविकायाः विंशति-दिनानन्तरं तस्य परिणाम आगतः। इदानीमपि स 'प्रथम' इति निर्दिष्टोऽभूत्। अद्य तस्य विश्वासो दृढो जातः यत् तस्मै सर्वकारस्य आजीविका अवश्यमेव

 प्रीतिः

मिलिष्यति तस्य आत्मनोऽपि एष एव ध्वनिरासीत्। आत्मा कथयति स्म-"चिन्तां मा कुरु, तव परिश्रमस्य फलं शीघ्रमेव मिलिष्यति।" मासे एव एषो ध्वनिः सत्यो जातः, यतः स पटियाला-नगरे मुख्य-लीपिकस्य पदमलभत्। एतत् कार्यं शीघ्रमेव बभूव, यत् स प्रीतिं पत्रमपि लिखितुं समर्थः न अभवत् परं अद्य पत्रं लिखित्वा पत्रमञ्जूषायामक्षिपत्।

प्रीतिः यदा पत्रं प्राप्तवती। पठित्वा, स्व प्रसन्नतां स्व मात्रे कथयमास। एतत् श्रुत्वा तस्याः मुखे अपि रक्तिमा आगता। निराशा आशायां परिवर्तिता। सा तु तादृशी शीघ्रता कर्तुं-मिच्छति स्म यत् प्रीतेः विवाहः अधुना एव भवेत्। लघु-परिवारे आह्लादस्य प्रवाहः वहति स्म।

प्रीतिः पटियाला-नगरे पूर्वमेव वाक्कील कक्षायां (एल. एल. बी) प्रवेशार्थं प्रवेशपत्रं दत्तवती आसीत्। यदा सा पठितवती यत् तत्रैव आजीविका मिलिता तदा तस्या मुखं विकसितं जातम्। साऽचिन्तयत्-'ईश्वरः भूयोऽपि एकत्री कुर्यात्।' सा स्व साक्षात्कार-तिथिः तस्मै पत्ररूपेण प्रेषितवती।

अद्य सतोषः वाष्पयानमञ्चे तस्या प्रतीक्षां करोति स्म, यतः प्रीतिः साक्षात्काराय आगमिष्यति; परं वाष्पयानस्य आगमने बिलम्बमासीत्। दशवादन-वेलायां लोहपथगामिनी आगता। द्वे हृदये मिलित्वा, स्नेहे निमग्ने जाते।

ततः महाविद्यालये प्राप्तवन्तौ। साक्षात्कारमभवत् । प्रवेश-शुल्कं परिपूर्णम् । यदा ततः आगच्छताम् तदा वाष्पयानस्य आगमने बिलम्ब आसीत् अतः तौ एकस्मिन् उपवने गत्वा स्व स्व दुःखानि कथयितुं मग्नौ जातौ परं तयोः दुःखानि मार्जक इव वर्धयन्ति स्म। अन्ततः संतोषेणोक्तम्-अधुना 'आवयोः वियोगो न भविष्यति'। 'आम् संतोष ! दैवमपि आवयोः स्नेहं स्वीकृतवान् यदि स्वीकृतं न अभविष्यत् तदा आवयोः भूयोऽपि मेलनमपि न ऽभविष्यत्। सम्प्रति माता पिता च आवयोः विवाहस्य प्रतीक्षां कुरुतः' । 'त्व वाक्कोल-परोक्षामुत्तीर्णां कुरु। विवाहः तु स्वयमेव भविष्यति।'

बाढम् , अधुना गन्तव्यं वाष्पयानस्य कालो जातः। सुकाले वाष्पयानमागतम् "तव शुभा यात्रा भवेत्" इति कथयित्वा वाष्पयानं कुशब्दान् 'कृष्णमुखा कुतः आगता ' कथयन् स्व प्रकोष्ठं प्रति आयातः तथा च प्रीतेः पुनरागमनस्य स्वप्नेषुनिमग्नः।

प्रीतिः गृहे गत्वा सर्वां वार्तां कथितवती यत् केन प्रकारेण संतोषः तामभिलत्, केन प्रकारेण तस्याः सहायतामकरोत्। श्रुत्वा, जननी प्रसन्नाऽभवत्।

प्रीतेः पिता तस्या मातरमाह- "प्रियतमे ! आवयोः बालिका अति प्रसन्ना दृश्यते। संतोषेण विवाहानन्तरम् इतोऽपि प्रसन्ना भविष्यति। संतोषस्य नाम श्रुत्वा एव तस्या मुखं

 प्रीतिः

विकसितं भवति, किं त्वमपि मम नाम श्रुत्वा प्रसन्ना भवसि अप्रसन्ना वा।" अधुना त्यजतु उपहास वार्ताम्। स्वपितु।

प्रीतिः द्वितीय-दिने एव पटियाला नगरं प्रति गन्तुं सत्वरतां कृतवती यद्यपि महाविद्यालयस्य उद्‌घाटने द्वे दिवसे आस्ताम् परं स्नेहस्याकर्षणं तां पूर्वमेव प्राणप्रियस्य समीपे नीतवान्।

यदा हुकमसिंहः महाविद्यालयात् बहिर् अकरोत् तदा तस्य पिता सुकार्यं कृतवान्, स प्रधानाचार्येण सह, कार्यालये जाताया वार्ताया अनन्तरं विचारयमास— "कलहस्य किं प्रयोजनम् ?" स स्व लालित-पुत्रं स्व नेत्राभ्यां दूरं पटियाला-नगरे प्रावेशयत्, परं तस्य रज्जु-चर्वणस्य स्वभावः सम्प्रति अपि नागमत्। कतिपय वारं बालिकाः तस्य पादुकाभ्यां सेवां कृतवत्यः। कतिपय वारं प्रधानाचार्यस्य आदेशस्य जालिकं जातम्, परं तस्य शरीरे न किमपि प्रभाव आसीत्। स न जानाति स्म यत् संतोषोऽत्रैव आजीविकां करोति।

एकदा हुकमसिंहो बारांदरी - उद्याने स्व-मित्रैः सह जल्पति स्म तदैव बालिकानां समूहः तस्मात् स्थानाद् अग्रे गतः। तासु प्रीतिः सदृशां बालिकां दृष्ट्वा तस्य नेत्रयोः समक्षे अन्धकार आगतः। सोऽचिन्तयत् -"किं एषा प्रीतिः, आम् प्रीतिः वर्तते। मम नेत्रे छलं न कुरुतः।"

प्रीतिः

स धावित्वा तासां समीपे प्राप्तवान्। प्रीतिः तमपश्यत् परं स्वमदे एव गच्छति स्म । हुकमसिंहस्य मनसि मोदकानि त्रुटन्ति स्म यदेश्वरः तस्य लुब्धकमत्र प्रेषितवान् ।

अधुना अवश्येमव इमाम् अधिगमिष्यमि। एषु विचारेषु स तासां पश्चात् एव गतवान् । यदा तु सौन्दर्य- समूहः महाविद्यालयस्य छात्रालयस्य द्वारे प्राप्तवान् , तदा तं ज्ञान-मभवत् , अधुना एषा बुलबुली वाक्कीलं भवितुम् आगता ।

सम्प्रति स प्रतिदिनं तत्र आगन्तुं समारब्धवान् । कतिपय वारम् प्रीतिं कुशब्दान् अपि अकथयत्, परं सा तं मूर्खं मन्यते स्म ।

प्रीतेः मनोऽपि शोकाकुलमासीत् यतः संतोषस्य दर्शनं न अभवत् अद्य सा तेन सह मेलनं कर्तुं निश्चयमकरोत् । छात्रा-लायाध्यक्षात् अवकाशं नीत्वा संतोषस्य कार्यालये गतवती। पञ्चवादन-वेलायां संतोषः कार्यालयाद् बहिरागच्छत् । प्रीतिं दृष्ट्वा तस्या पार्श्वे आगतः। तौ चलितवन्तौ। सा मार्गे सर्वां कथां कथितवती ।

संतोषः व्याकुलोऽभवत् अवदत् च - 'प्रीते! ईश्वरोऽपि आवयोः परीक्षां करोति । देवः भूयोऽपि हुकमसिंहम् आवयोः प्रेम्णि अग्निं दातुं प्रैषयत्।" 'किं जातम् , भयं मा कुरु, मम सर्वंकार' !'अहमपि न बिभेमि ! तस्य खण्डशः करिष्यामि, स्व-बरं

प्रीतिः

दर्शयिष्यामि यावत्पर्यन्तं श्वासाः सन्ति ।

यदा तौ मैडीकल - महाविद्यालयस्य समीपे प्राप्तवन्तौ तदा एका तैलद्विचक्रिका (मोटरसाईकल) तयोः समक्षे आगत्य मार्गमवरोधितवती । यदा अपश्यत् तदा नेत्रयोः उपनेत्रं दूरी कृत्वा हुकम सिंहः कुनेत्राभ्याम् अवलोकयति स्म । संतोषः कथनात्पूर्वमेव सः अवदत्-"जार । अत्रापि पृष्ठं न अत्यजः । मित्रता तु ईदृशी भवेत्' । 'हुकमसिंह ! मा प्रलापयतु' । 'प्रलापोऽधुना तस्मिन् दिवसे ज्ञास्यति यदा एषा सुन्दरी मम पिञ्जरे भविष्यति । एवं कथयन्नग्रे अचलत् संतोषस्य च प्रहारं कर्तुमुपरिकृता मुष्टिः व्यर्था जाता ।

संतोषः प्रीतिमकथयत्- "व्याकुलतां मा गच्छ । अयं श्वानः, श्रृगाल एव अस्ति । जट्टानां गृहे अस्य जन्म कुले कलंकः वर्तते' । 'बाढम्, मम हृदयांश ! न व्याकुलतां करिष्यामि । परम् अधुना आज्ञां ददतु ।' 'अहं कोऽस्मि आज्ञां दातुम् ?' 'सम्प्रति भवान् एव मम देवोऽस्ति ।' पुनः संयोगस्य प्रतिज्ञां कृत्वा वियोगं प्राप्तवन्तौ ।

संतोषसिंहः अत्यधिकं क्लेश- समुद्रे निमग्नो जातः । भोजनं विना एव अस्वपत् परं निद्रा तस्मात् दूरमेवासीत् । यदा निद्रा आगच्छत् तदा भयानक - स्वप्नमपश्यत् । सः पश्यति स्म-प्रीतिमुत्थाय पापिनः अनयन्, स्वयं च वसुधायां पतितः स्य-

प्रीतिः

न्दति स्म। स प्रलापं करोति स्म। अनेन प्रकारेण न भवितुं शक्नोति, अहं पापिनं मारयिष्यामि। तदैव प्रतीहार: 'जागृहि' इति ध्वनिं चकार। तस्य स्वप्नो भङ्गोऽभवत्।

स चिन्तायामेव कार्यालये गतः। तत्र गत्वा कार्यमपि न कर्तुम् अशक्नोत्। क्लेशे एव पञ्चवादन-वेला जाता। स्व प्रकोष्ठे प्रत्यागच्छत्।

६

सूर्यवासर आसीत् । संतोषः स्व पित्रा सह स्व ग्रामस्य मोटरयानालये पारिभद्र-वृक्षस्य अधः तिष्ठन् कस्याश्चित् प्रतीक्षां करोति स्म। प्रत्येकः तस्य पितरं कथयति स्म-"गज्जन-सिंह ! किमद्य काऽपि विशेष-वार्ता वर्तते"। 'आम्, अद्य संतोष सिंहं द्रष्टुं आगच्छन्ति। कुतः ? फरीदकोट- समीपस्थात् पंच-गरायीं नगरात्, बालिकाया पिता ग्रामाध्यक्षः वर्तते अभिमानेन गज्जन सिंहः प्रत्येकं कथयति स्म।" प्रति पुरुषस्य मुखे एषो ध्वनिरासीत यत् गज्जन सिंहस्य सुतः प्रशंसायोग्यो वर्तते। ईदृशाः बालका एव कुलस्य नाम प्रकाशयन्ति, ईश्वरः ईदृशं बालकं प्रयच्छतु सर्वेभ्यः। जनेभ्यः प्रशंसां श्रुत्वा, गज्जनसिंहस्य पादौ वसुधायामुपरि न तिष्ठतः स्म।

सम्भवतः एकादश-वादनवेलायां प्रीत्याः माता पिता च तत्रागतौ। द्वौ परिवारौ स्नेहेन अमिलताम्। मिलित्वा, गृहं प्रति गतौ।

संतोषस्य गृहं दृष्ट्वा प्रीत्या माता स्व पतिदेवमकथयत्,-"श्रीमन् ! गृहं प्रति पश्यतु"। ग्रामे एतादृंशि गृहाणि भवन्ति। परिवारस्य स्वभावं प्रति पश्य, ? कीदृशं मधुरं स्वभावं विद्यते।"

प्रीतिः

वार्तासु एव द्विवादन-वेला जाता। ग्रामाध्यक्षोऽवदत्-"आवयोः प्रीत्याः शिक्षायाः अन्तिमं-वर्षं वर्तते। तदनन्तरं विवाहं करिष्यावः तथा च प्रीतेः वाग्दानं परिपक्वं - कर्तुं सपादाधिक-रुप्यकं दत्वा स्व गृहं प्रत्यागच्छताम्।

गज्जन सिंहः हर्षे उन्मत्तोऽभवत् यतः स स्व - जीवने कदापि हर्षस्य छायां न अपश्यत्। स्व मित्रैः सह स्वहर्षं विभाजितम्। आनन्दे सः अत्यधिकां सुरां पीतवान्। लोकान् अपि अपाययत्।

अन्ततः संन्तोषेणोक्तम् — "जनक ! हिताहितं वीक्ष्य कार्यमाचरेत्। परं जनकः तस्य एकां वार्तामपि न शृणोति स्म अवदत् च-"पुत्र ! त्वं क्लेशं त्यज। अहं सर्वं यथार्थं करिष्यामि, अद्य तु हर्षस्य कालो वर्तते। पुनः वेला न आगमिष्यति क्रोधं त्यज, हर्षं मानयतु।"

तदनन्तरं संतोषः स्व नगरं प्रति गतवान्। रामपुरा-फूल नगरात् स वाष्पयानम् गृहीतुं प्रयत्नम् अकरोत्। यदा स चिटिकां नीत्वा वाष्पयान-मञ्चे आगतः तदैव लोहपथगामिनी आगता। दिष्ट्या, प्रीतिः अपि तस्मिन् याने आगच्छति स्म, गवाक्षात् बहिर पश्यति स्म, यतः संभवतः संतोषः एव मिलेत्।

संतोषः प्रीतिमपश्यत्। स्व प्रसेवकं (Bag) कण्ठे क्षिप्त्वा तस्या पार्श्वे आयातः। अग्रतः एकमपरं वाष्पयानमायाति स्म।

प्रीतिः

यस्मात् काणाद् वाष्पयानस्य गन्तुं विलम्बमासीत् । विलम्बं दृष्ट्वा सतोषः चायं मिष्ठान्नं च आनयत्, यदा स प्रीतिं मिष्टान्न खण्डं दातुम् ऐच्छत् तदा प्रीतिः अहसत्, संतोषोऽपि अहसत् । साऽकथयत् - "अधुना मिष्टान्नखण्डेन एव गृहपूर्णं करिष्यति ।" नहि, शुभे ! सम्प्रति अहं तव अस्मि मिष्ठान्न-खंडानां आवश्यकता न भविष्यति ।'

तदनन्तरं वाष्पयानं चलितम् । तौ स्व, गत-जीवने संलग्नौ जातौ ।' 'किम् ? अहं भवन्तं कथितवतो यत् 'मम माता पिता च ममेच्छां पूर्णां करिष्यतः । तौ ह्यः इच्छां पूर्णाम् अकुरुताम् ।

आम् , प्रीते: अहमपि विचारयामि यत् 'यदि माता पिता च अनेन प्रकारेण विचारयतः तदा अनेकेषां जीवनानां सुरक्षा भवितुं शक्नोति । जनाः कथयन्तियत् प्रेम-विवाहः सफलो न भवति । अहमपि कथयामि स्म, एतत् अनुचितमस्ति परं यदि मातुः पितुश्च अनुमोदनं स्यात् तर्हि प्रेम-विवाहः, आदर्श-विवाहो भवितुं शक्नोति !

परं प्राचीन - विचार - मग्ना जना न जानन्ति यत् अधुना प्राचीन-कालो न वर्तते । समयः परिवर्तितः । ते अधुना जानन्ति 'प्रेम विवाह-कारणाद् कुलस्य अप्रतिष्ठा नास्ति ।" अनेन प्रकारेण दर्शन-शास्त्रस्य वार्तां कुर्वन्तौ तौ न अवित्ताम् यत् कदा तौ स्व लक्ष्यस्थाने प्राप्तवन्तौ ।

स्व कार्यालये गत्वा स स्व मित्राणि इमं समाचारं वक्तुं लघु-चायपान- कार्यक्रममायोजितवान् । यदा सर्वे कर्म चारिणः समागताः तदा स अवदत्-"हे सखायः! मम वाग्दान्-हर्षे स्वीकारं कुरुत। सर्वे करतालं कृत्वा साधुवादान् प्रायच्छन्।

परं तेषु गंगा रामः प्रसन्नतां न लब्धवान्। यतो हुकम सिंहः संतोषसिंहस्य कार्यालयं यावत् स्वप्रतिष्ठां स्थापितवान्। तेन गंगारामेण सह मैत्री कृता। गंगारामः तस्मिन् काले एव स्व द्विचक्रिकां नीत्वा हुकमसिंहं समया अगच्छत् अकथयत् च, 'यत संतोषेण सह प्रीत्या वाग्दानमभवत्?' 'किम् अभवत्? अहं तेन सह तस्य विवाहो भवितुं च वाञ्छामि। तस्याः स्वाभिमानं चूर्णयित्वा स्व कामेच्छां पूर्णां करिष्यामि ? किम् बहुना, अधुना संतोषा मम मार्गे लोष्ठवत् वर्तते कस्मिश्चित् समये व्यामर्दयिष्यामि।'

साधु सखे! अधुना, यामि कार्यालयाद् अपि चौर्य-रुपेण धावित्वा आगच्छम्।' 'नहि सखे! किमपि न भविष्यति चिन्तां मा कुरु।'

परं तदनन्तर स शंका सागरे अपतत् यतः तस्याः कोकिलायाः अन्तिमं वर्षं वर्तते। अहमत्र द्वौ वर्षौ यावत् वत्स्यामि। प्रथममेव बी. ए. प्रथम - वर्षं - कर्तुं पञ्च वर्षाणि व्यतीतानि,

प्रीतिः

प्रेप-परीक्षा अपि अनुकरणेन उत्तीर्णा कृता। सा तु सकुशला वर्तते। अवश्यमेव उत्तीर्णा भविष्यति गमिष्यति च, भूयः मम हस्तयोः न पतिष्यति, संतोषस्य गृहिणी भविष्यति, श्यालिका बलपूर्वकमपि हस्ते न आयाति। संतोषस्यैव हननं क्रियताम् कमपि चाण्डालं सहस्राणि रूप्यकाणि दत्त्वा। अनेन प्रकारेण स स्व-मित्रैः सह परामर्शं कर्तुमचलत्।

१०

मार्चमासोऽयम् । मन्दं मन्दं वर्षा वर्षति स्म । शीतल-वायुः हृदयमाकर्षति स्म । भास्करोऽपि लोकैः सह उपहसति स्म, कदापि आतपः पलकमात्रसमये गम्भीरः छायायुतश्च भवति स्म । अधुना समयमतीव मधुरमासीत् । अस्मिन् मधुरे काले प्रीतिः संतोषश्च नाभाराजमार्गे गच्छतः स्म ।

प्रीते ! पश्यतु, कियत् हठाल्लोटनं समयो वर्तते । मनः करोति, अद्य अस्य साफल्यं भवितव्यम् । 'किमर्थम् ?' अर्थं तु चण्डीगढ़-नगरं प्रति गन्तव्यम्, भ्रमणमेव करिष्यावः' यतोऽस्मिन् रसपूर्ण-समये दिवसोऽपि रसपूर्णो व्यतीतो भविष्यति ।

बाढम्, मम चेतोऽपि करोति, पर मम पठनस्यावस्था न श्रेष्ठा.। 'एकस्मात् दिवसात् किं भविष्यति । सायंकाले प्रत्यागमिष्यावः ?' 'तव इच्छा ।' अहं छात्रावासात् स्व ग्रन्थिं नीत्वा आयामि यतः, रुप्यकाणि अपि भवितव्यानि ।' 'अहमपि अवकाश—पत्रं दत्वा प्रत्यागच्छामि; मोटरयान—मंचे तव प्रतीक्षां च करिष्यामि ।'

दश—वादन समये प्रीतिः तत्रायाता । संतोषः पूर्वमेव शेरे पञ्जाब—पण्यभोजनालयस्य समीपे तिष्ठन् तस्या मार्गे नेत्रे अस्थापयत् । तां दृष्टवा तस्या पार्श्वे आगच्छत् ।

प्रीतिः

यू. टी. मोटरयाने चण्डीगढ़—नगरे आगच्छताम् तत्र दर्शनीय—स्थानानि पश्यन्तौ यदा राक—उपवनं द्रष्टुं चिटिकां नीत्वा अभ्यन्तरे आगच्छतां तदा प्रीत्याः मनः आश्चर्य-सागरे निमग्नम् अवदत् च—"संतोष ! कियत् परिश्रमं कृत्वा शिल्पकारेण स्व शिल्पिता दर्शिता। यदि अत्र द्रष्टुं योग्यं कमपि रमणीय-स्थलं वर्तते तर्हि केवलं राक-उपवनस्य एव अस्तित्वम शेषं तु अस्य सम्मुखं प्रभाहीना एव प्रतीयन्ते स्म।

शीघ्रमेव तौ पुनः मोटरयानालये आगत्य पञ्जौर-उपवनं प्रति गन्तुं मोटरयानं प्राप्तवन्तौ। तत्र गत्वा, प्रेम युगलानि दृष्ट्वा तावपि प्रेम—संसारे तल्लीनौ अभवताम्।

यदा पंचवादनवेलायां चण्डीगढ़ नगरे भूयोऽपि प्राप्त-वन्तौ तदा 'रिमझिम'—वर्षा वर्षति स्म। घोरः सायंकालो जातः। "पड़—पड़" करका निपतन्ति स्म। वर्षायामेव तौ मोटरयानं गृहीत्वा पटियाला—नगरे आगच्छताम्।

अत्रापि वर्षा वर्षति स्म। भुवि पानीयं पानीयमेव आसीत्। सर्वत्र कर्दम आसीत्। समन्ततः पिच्छिल-भूमि कारणाद् अनेके जनाः 'धड़-धड़' निपतन्ति स्म। विद्युद विलसति स्म।

प्रीतिः भयकारणाद् संतोषस्य हस्तं गृहीतवती। सा छात्रालये गन्तुं सत्वरतां करोति स्म परं संतोषोऽवदत—"भो

प्रीतिः

प्रीते। कुत्र गमिष्यसि मया सह एव चल।" प्रीतिः 'न' कर्तुमसमर्था आसीत्।

त्रिचक्रिकां गृहीत्वा तस्य प्रकोष्ठे समागतौ। प्रीतिः भोजनमपचत् स्नेहेन खादितुं तल्लीनौ जातौ। पूर्वं प्रीतिः ग्रासं संतोषस्य मुखे प्रेम्णा अक्षिपत। यदा प्रीतिः स्व मुखं ग्रासं प्रति कृतवती तदैव स ग्रासं निजं प्रति अक्षिपत्। प्रीतिः स्मित्वा, संतोषस्य हस्तौ गृहीत्वा ग्रासं बलपूर्वकं स्वमुखे अक्षिपत् दशनतर्जनमकरोत्।

भोजनं कृत्वा यदा शयितुं कटिबद्धौ जातौ तदा तत्र एक एव पर्यङ्कः, आसीत्। संतोषोऽकथयत्—"भो प्रीते! त्वं पर्यङ्के स्वपिहि, अहं तु बद्धवसुधायां स्वप्स्यामि। 'नो सन्तोष! नोचितम्' त्वमेव वद, किं कर्त्तव्यम्? तया हास्येनोक्तम्।' 'किं कर्त्तव्यम्? अर्धः पर्यङ्कः तव, अर्धः च मम।' 'संतोषः स्मयं चकार, प्रीतिरपि नेत्रयोरेव मन्दस्मितं चकार।

तौ एकस्मिन् पर्यङ्के एव अपतताम्। परिश्रमात् निद्रा बाधते स्म परं स्वप्तुं समर्थौ न जातौ।

तयोः शरीरं नातिदूरमासीत् परं परस्परं न स्पृशति स्म। सहसा एव प्रीत्याः शरीरं संतोषेण सह स्पृष्टम्। तस्य शरीरे विद्युत् इव कम्पनमभवत्। सोऽचिन्तयत्—"यत अकस्माद् किं जायते?"

पुनः संतोषेण स्व पादस्य वाम—अङ्गुष्ठेन प्रीत्याः पादः प्रतिनिरुद्धः प्रीतिः ध्यानान्तरितभावा जाता, तदैव विद्युत

प्रीतिः

अविलसत् । प्रीति अवदत्—"संतोष ! शीतं बाधते, भयमपि लगति,"। इति कथयित्वा सा तेन सह अलगत्। तयोः शरीरौ एकरुपे परिवर्त्तितौ ।

संतोषेणोक्तम्—"किं भयम्, मम उपस्थिते सति ? शीतं स्वयमेव समाप्तं भविष्यति ।" तस्य करः तस्या पृष्ठदेशे भ्रमति स्म । प्रीत्याः शरीरस्यातिशीतलता दूरी भवति स्म। साऽपि स्व कोमल—कराभ्यां तस्य करं गृहीत्वा निरुद्धवती । तौ प्रेम्णा सीमाम् अतिक्रामतः स्म । शनै-शनैः संतोषस्य करः तस्याः सकल-शरीरस्य अन्वेषणं कर्तुमारब्धवान् ।

प्रीतिरपि कामान्धा आसीत। पञ्चशरः तौ अन्धौ कृतवान् । कामे मंगलमयीं रात्रिमानन्दयितुं स्व पावन-संगस्य मर्यादाम् अत्रोटयताम् । मर्यादा-भङ्गं कृत्वा अस्वपताम् ।

प्रातःकाले यदा उत्थितौ तदा रात्रौ कृतस्य कार्यस्य स्मरणं कृत्वा व्याकुलौ जातौ । चिन्ता-सागरे अपतताम् । प्रीतिः चिन्तयति स्म, यत् किं कृतम्; आवयोरयम् अतीव, भ्रमः अस्ति । कामदशायां स्व कर्तव्यमपि स्मरणं न जातम् अधुना किं भविष्यति ? सा तु अतीव व्याकुला जाता ।

संतोषोऽपि पीतवर्णोऽभवत् परं प्रीतिम् अवलोक्य प्राह—"प्रीते ! अधुना व्याकुलतां त्यज, किमपि न भविष्यति, भयस्य आवश्यकता न, द्वौ मासौ यावत् आवयोः गठ-बन्धनं भविष्यति अतः पश्चात्तापस्य न कमपि प्रयोजनम्" इति

प्रीतिः

कथयित्वा चायपानं कृत्वा तस्याः महाविद्यालयं प्रति आगच्छताम् ।

कार्यालये गत्वाऽपि संतोषस्य चेतः व्याकुलमेवाभवत् सोऽस्मिन् विषये एव अविचारयत्, अर्धमवकाशं गृहीत्वा प्रत्यागच्छत् मार्गे तस्य साम्मुख्य हुकमसिंहेन सह अभवत्। अद्य स पूर्वमेव दुःखी आसीत् उपरितः, अन्या एका विपत्तिः समागता।

अद्य तस्य सौभाग्यं तस्य सहायतां कृतवान्। स हुकमसिंहस्योपरि पाद-प्रहारमकरोत्, स तत्रैव अपतत्। तस्य मित्राणि तस्य सुरक्षणे स्थितानि अभवन्। संतोषः स्व चेतः शान्तं कर्तुमुपवनं प्रति गतवान्।

यदा उपवने प्राप्तः तदा तत्र प्रीतिः अपि तस्य दृष्टिपथे आगता या स्व सखीभिः सह चायपानस्य स्वादं नयति स्म। प्रीतिः अपि यदा संतोषमपश्यत् तदा तस्या मनः करोति स्म यत् शीघ्रमेव गत्वा संतोषस्य आलिङ्गनं कुर्यात्, परं सखि-कारणाद् धैर्यहीना जाता, परं सा सुनीतामकथयत् —"सुनीते" आवां तत्र गच्छावः अत्र तु मनः न लगति।

सुनीतां नीत्वा यदा सा संतोषस्य समीपे आगत्य रुद्धा तदा सुनीता अकथयत्—"अयं संतोषः वर्तते यस्य स्मरणं सदैव करोषि, कथयसि च, मम संतोषः परमसुन्दरो वर्तते" इति चिन्तयित्वा साऽपिध्यानमग्ना जाता। सा अचिन्तयत्—"कदा तस्याः अपि प्राणप्रियः भविष्यति।" प्रीतिः तु संतोषस्य

प्रीतिः

मुखं दृष्ट्वा अवदत्—"का वार्ता ?" काऽपि न परमतीव-विस्तीर्णा, रात्रौ यं प्रमादं आवाम् अकुर्वः तस्य प्रमादस्य क्लेशः मम मनः दुःखी करोति।' प्रीतिः प्राह—"प्रिय संतोष ! गतस्य शोचनं नास्ति । ईश्वरो हितमेव करोति, परं मनुष्यः ईश्वरस्य लीलां न पश्यति। अत्र प्रमादे अपि आवयोः हितमेव भविष्यति। अतः चिन्तां त्यजतु । 'मम प्रेम्णः शपथम्' यदि चिन्तां करिष्यति । आवयोः विवाहो भविष्यति। तदा चिन्ता किमर्थम् । संतोष ! व्याकुलो न भवतु। मम चेतोऽपि दुःखी भवति, भवन्तं दृष्ट्वा ।"

बाढम्, मम प्राणदायिके ! न भविष्यामि उदासीनः । प्रीतिः हास्यं विकसन्ती, नातिदूरं तिष्ठन्त्याः सुनीतायाः हस्तं गृहीत्वा चायपानस्यानन्दे पुनः मग्ना जाता ।

—0—

११

संतोषसिंहस्य पाद-प्रहारं किं जातम्, हुकमसिंहः कतिपय दिनानि यावत् पर्यङ्कात् न उदतिष्ठत्। यदा नीरोगो जातः तदा तस्य रक्तम् उत्कूर्दति स्म। तेन क्रोधेनोक्तम्—"हे सखायः। अधुना संतोषसिंहं हत्वा अपि प्रीतिं प्राप्स्यामि।" स एव महाविद्यालयस्य मार्गं त्यक्तवान्, प्रीतेः महाविद्यालयं परितः भ्रमति स्म, यतः धनिक-वर्गस्य छात्राणां एषा अभिरुचिः वर्तते, ते स्वाभिरुचिं पूर्णाय अत्र आगच्छन्ति।

हुकमसिंहः बी. ए. प्रथमे भागे एव आसीत् परञ्च बालिका-पादुकानां शिरसि प्रहारसहने तेन एम. ए. परीक्षा उत्तीर्णा कृता आसीत् सम्प्रति स प्रीतेः स्वप्नेषु मज्जति स्म, एकदा तु प्रीतिः तस्य वशे आगच्छत् परं तस्याः एव महाविद्यालयस्य प्राध्यापको गुरचरनसिंहः सहसा एव आगतः, अन्यथा स स्वयोजने सफलोऽभविष्यत्। तस्य मुख्यकार्यमासीत् प्रीतेः उपलब्धिः।

एकस्मिन् दिवसे संतोषसिंहः कार्यालयाद् आयाति स्म। तेन सह तस्य सुहृद् आसीत्। परं स मार्गे एव विछिन्नोऽभवत् संतोषश्च प्रीतिं दत्तसमयानुसारं मोती-उपवनमार्गं प्रति अचलत्।

प्रीतिः

स एन. आई. एस. विद्यालयं निकषा आसीत्, तदैव तस्य शत्रव आगताः। तान् दृष्ट्वा संतोषः धैर्यहीनो जातः। तस्य द्विचक्रिका अकम्पत् ते युगपदेव तं भृशमपीडयन्, तत्रैव च त्यक्त्वा पलायिताः। संतोषः निसंज्ञो जातः किञ्चित् कालान्नतरं द्विचक्रिका-युक्तः पुरुषः तत्रागतः। तस्य दृष्टि-संतोषस्य उपरि अकस्मात् पतिता, यतः स क्रन्दति स्म, स संतोषमुत्थाप्य रुग्णालये नीतवान्।

मोती-उपवने दत्त-समयानुसारं यदा संतोषो न समायातः तदा प्रीतेः चेतः व्याकुलोऽभवत्। सा अर्ध-होरां यावत् प्रतीक्षां कृतवती। तस्य आत्मा प्राह—"कथमत्र उपविष्टाऽस्मि, गत्वा तस्य ज्ञानं क्रियताम, न जाने स कथं न आयातः।" शीघ्रमेव त्रिचक्रिकां गृहीत्वा तस्य प्रकोष्ठे गतवती। तत्र गत्वा किं पश्यति यत् कोऽपि नरः तस्य प्रकोष्ठस्य तालकमुत्पाटयति। पृष्टे सति, तेनोक्तम्—"स रुग्णालये अधिकाधिक-गम्भीर-अवस्थायां वर्तते" श्रुत्वा, प्रीतिः निसंज्ञा जाता परं धैर्यं धारयित्वा अचिन्तयत् हुकमसिंहेन एव तस्य एषा अवस्था कृता तेनैव पुरुषेण सह आरोग्यशालामागता।

संतोषो लुप्तसंज्ञ आसीत्, प्रीतिरकथयत्—"किं जातम् मम प्रियतम!" तस्याः प्रणय-शक्तिः तस्य नेत्रे उदघाटयत्। तस्मिन् एव समये चिकित्सकः दूर-भाषणं कृत्वा मुख्य-राजपुरुषमाकारयत्। यदा आरक्षिक स्थानाधीश आगतः तदा संतोषः वक्तुं प्रयतते स्म परं शब्दाः मुखे आगत्य एव अवरुद्धन्ति स्म। आंग्लचिकित्सकः सूचिकां न्यवेशयत् सूचिका-

प्रभावेन तेन रुद्धकण्ठेनोक्तम्—"मे...प्रि...य...तमे ! अहं स्वर्गं गच्छामि,...मम एषा अवस्था हुकम सिंहेन विहिता... किम् अधुना त्वं ममेच्छां पूर्णं करिष्यसि।" "अवश्यमेव करिष्यामि परं भवन्तं न किमपि स्यात्।" नहि प्रीते! अहं क्षणानाम् अभ्यागतोऽस्मि प्रणय-चिन्हस्य सुरक्षा कर्तव्या। हुकमसिंहात् मम प्रतिकारो नय, परम् अनेंन प्रकारेण न, संविधानस्य आश्रयं नीत्वा।"

तदैव तस्य शिरः प्रीतेरङ्के अपतत्। तस्या नेत्रे रक्तिमे जाते। संतोषस्य मस्तिकस्य चुम्बनं गृहीतवती सा प्राह—"संतोष! भवतः 'प्रेम्णः शपथम्' भवतः इच्छां पूरयिष्यामि। अहं हुकम सिहं दर्शयिष्यामि यत् कस्यचित् इच्छा-दलनस्य परिणामः किं भवति? तदैव तस्या नेत्रे अश्रूणि वर्षा इव वर्षितुं प्रारब्धवन्तः।

प्रीतिः निर्वेश-मत्तरं गृहीत्वा संतोषस्य ग्रामं प्रति अचलत्। यदा तस्य गृहस्याग्रे निर्वेशमत्तरं रुद्धम्, तदा तत्र जनाः एकत्रिताः अभवन्। गज्जनसिंहः स्व पुत्रं मृतं दृष्ट्वा निःसंज्ञो भूत्वा वसुधायाम् अपतत् तदैव प्रीतिः जलं नीत्वा अपाययत् चेतनां प्राप्य अकथयत्—"पुत्रि! किं जातम्? केन प्रकारेण अभवत्?" प्रीतिः सकलं वृतान्तं वर्णितवती।

सायंकाले पञ्चवादनवेलायां संतोषस्य संस्कारः कृतः। सम्प्रति तु गज्जनसिंहः पुनः चैतन्यहीनोऽभवत्। चिकित्सक

सहाय्येन चेतनामागतः । गज्जनसिंहेनोक्तम्—"संतोष एव मम अवलम्ब आसीत्। कस्य आश्रये जीवनं यापयिष्यामि।" मम आश्रये जनक !' तत्र उपस्थिताःसकल-जनाः प्रीतिं प्रति अपश्यन् । "परं, पुत्रि ! मम भाग्यमेव न श्रेष्ठं विद्यते, त्वं स्व-जीवनं कथं व्यर्थं नयसि इदानीं कथं मम आश्रयं भविष्यसि । पुत्रि! इदानीं यावत् तव आवाभ्यां सह संसर्ग आसीत्।' 'नहि पितः ! अहं भवतः स्व प्राणान् क्षयं कृत्वा अपि सेवां करिष्यामि। अस्मिन् गृहे एव वत्स्यामि।' 'नहि सुते ! एतत् भवितुं न शक्नोति।' तव माता पिता च आज्ञां न दास्यतः। अतः प्रवीण-बालकेन सह विवाहं कृत्वा, संतोषस्य स्मरणं कुर्वन्ती जीवनं यापय।' 'एवं न भविष्यति, मम संतोषण सह पूजास्थले विवाहो जातः। अहं तस्य शिशोः... अस्मि तेन सह प्रणयशपथं कृतम्। प्रणय-शपथम्, असत्यं न करिष्यामि अत्रैव वत्स्यामि, न कोऽपिरोद्धुं शक्नोति अहं चण्डालवघेलसिंहस्य पुत्रं दिवसे एव तारकाः दर्शयिष्यामि अन्यथा मम नाम प्रीतिः न भविष्यति। तदैव तस्याः नेत्रयोः वाष्पाणि आगतानि संतोषस्य मातृष्वसायाः बालिका तां निगृह्य अनयत्।

द्वितीयदिवसे प्रातकाले एव भोजनं विना, सा स्व ग्रामं प्रत्यगच्छत्। यदा सा गृहे प्राप्ता तदा तस्याः माता तस्याः विवर्ण-मुखं दृष्ट्वा अवदत्—"पुत्रि ! त्वं किमभवः ?" तदैव प्रीतेः नेत्रे अश्रुभिः परिपूर्णे जाते, रोदितुमारब्धा।

रोदित्वा एव सा सकलं वृतान्तं कथितवती। मातुः नेत्राभ्यां अश्रूणि अपतन् परं सा अकथयत्—"पुत्रि! मा अरोदः, धैर्यं धारय परं तस्याः रोदनं नान्तं जगाम् सकला रात्रिः रोदने एव व्यतीता।

प्रभातोऽभवत्। प्रीतिः स्व नगरं प्रति गन्तुं प्रवृत्ता यतः परीक्षाः अपि नातिदूरमासीत्। माता पिता च ताम-कथयताम्—"पुत्रि! ईश्वरो यत् करोति शुभमेव करोति। तस्य गृहे अन्धकारो न वर्तते। यत् ईश्वराय शुभं भवति स एव भवति। अधुनाः पठने ध्यानं देहि, प्रीतिः विनैव प्रत्युत्तरं दत्वा, अचलत्।

पटियाला-नगरे समागता। यदा वाष्पयानमञ्चे प्राप्ता तदा वारं वारं भ्रमरुपेण संतोषस्य मुखं तस्याः समक्षे आगच्छति स्म, परं यदा यथार्थं पश्यति स्म तदा तत्र किमपि न भवति स्म। कतिपय दिनानन्तरं परीक्षा समाप्ता। सा गृहं प्रत्यगच्छत्।

प्रीतिः

{ १२ }

अधुना प्रीतिः सदैव उदासीना एव अभवत्। सा चिन्तयति स्म यत् किं चिन्तितमासीत्, किं च जातम्। स्व-स्मरण-चिन्हानि स्मृत्वा स्मृत्वा दुःखिता भवति स्म। कमपि कार्यं कर्तुं तस्या मन एव न करोति स्म।

एकदा तस्या माता पिता च अकथयताम्—"पुत्रि। आवां तवेच्छानुसारम् अर्कुवः परम् ईश्वरस्य इच्छा न। अधुना किं कुर्याव किं च न कुर्याव"। 'अहं संतोषस्य पितुः सेवां करिष्यामि'। परम् एतत् कथं सम्भवति?' 'सम्भवति, यतः अहं संतोषस्य भार्या अस्मि। तेन सह पूजास्थले विवाहं कृतवती पञ्चषड्मास पर्यन्तं तस्य शिशोः माता भविष्यामि।' तस्याः वार्तां श्रुत्वा तौ मौनमभवताम्, तस्याः मुखं प्रति पश्यतः स्म, परं सा निरन्तरं वदति स्म-"अहं संतोषेण सह प्रणं कृतवती अस्मि, प्रणय-शपथं गृहीतम्। यो मृत्यु-समये सोऽकथयत्, तं पूर्णं करिष्यामि।" 'परं त्वां लज्जा नागता, आवयोः सम्मानं मृत्तिकायां प्रक्षिप्तम्, माता क्रोधेन अकथयत्।' 'मम्मे ! इदानीं किमपि न भवितुं शक्नोति। पश्चातापं मा कुरु। अहं श्वः गमिष्यामि, संतोषस्य गृहे।' 'उचित एव तवेच्छा, 'परं यदि तस्य पिता त्वां गृहे प्रवेष्टुम् आज्ञां न अयच्छत्, तस्या पिता अवदत्।' 'जनक ! तस्य पित्रा सह वार्तां कृत्वा एव अत्र आगच्छम्।' 'पुत्रि !

आवामपि त्वया सह गमिष्यावः, वार्ता कृत्वा त्वां तत्रैव सेवार्थं त्यक्त्वा प्रत्यागमिष्यावः आवां तव सुखार्थं स्व प्राणान् अपि त्यक्ष्यावः।' 'अलम् जनक ! अलम् यदि मे कृते किमपि कर्तुमिच्छति तर्हि मम पटियाला-नगरे कस्यापि वाक्कीलं समया अभ्यासं कर्तुं नियोजयताम्, संतोषस्य मातृष्वसायाः बालिकां नीत्वा तत्र वत्स्यामि'। 'आम्, प्रीते ! त्वया उचितमेव उक्तम्।'

आगामी-दिवसे ते संतोषस्य ग्रामं प्रत्यगच्छन्। तत्र गत्वा प्रीतेः माता पिता च सकला वार्ता, गजन सिंहं कथयमास। गजनसिंहोऽवदत्-"कृपया, भवान् एव सुतामुपादिशतु यत् कथं जीवनं नाशयति ? मम वचनानि तु तस्याः उपरि न कमपि प्रभावं कृतवन्तः।" परमावयोः उपदेशमपि न गृहीतवती ! वयं किं कर्तुं शक्नुमः ? अधुना तु तस्या एवेच्छा सर्वोपरि वर्तते।'

हुकम सिंहो यदा ज्ञानमभवत् तदा तस्य पादाभ्यामधः मृत्तिका निर्गता। परं किं भवितुं शक्नोति स्म ? सश्रुत्य एव स्व मित्रं स्व गृहं प्रति प्रेषयमास अवदत् च—'सखे ! पित्रा सह आगच्छ।" बघेलसिंहस्यागमात् पूर्वमेव रक्षापुरुषाः हुकम सिंहम् अगृह्णन्। पिता आगत्य तस्य लग्नकं दत्वा, तं गृहे आनयत्।

गज्जन सिंहोऽपि प्रीतेः सहाय्येन सुप्रसिद्ध-वाक्कीलमकरोत् यः प्रीतेः सम्बन्धी एव आसीत् तेन सह प्रीतिः स्वाभ्यासं कर्तुमारब्धवती। सा अधुना संतोषस्य मातृष्वसायाः बालिकया सह पटियाला नगरे एव निवसति स्म। अत्रैव कतिपय-

मास पर्यन्तं प्रीतिः एकं पुष्पमिव शिशुं जन्म अददात् , यं दृष्ट्वा परिवारस्य अर्धक्लेशम् अपगमत् । अस्मात् कारणात् प्रीतेः अभ्यासे हानिः तु जाता परं शीघ्रम् एव शिशुं ननान्दृ-समीपे त्यक्त्वा अभ्यासं कर्तुं गतवती।

प्रीतेः वाक्कीलः पूर्णं विश्वासं आसीत्, यत् सा अभियोगे सफलतां प्राप्स्यति। हुकमसिंहः कारागारस्य पवनं खादिष्यति परं न्यायाधीशः न्यायकरणस्य नामापि न गृह्णाति अस्य किमपि रहस्यमासीत्। किं रहस्यमासीत् , 'रूप्यकाणि' एव रहस्यमासीत्-यतः धनमीवृक् वस्तु वर्तते यद् अस्मान् स्व कार्यात् अपनयति वयं स्व कर्तव्यस्य ज्ञानं न कुर्मः। अस्य धनस्य मदे वयं न चिन्तयामः यत् अस्मात् कारणात् कस्यापि जीवनं विनश्यति, ततः कोऽपि दस्युः वृतिं गृह्णाति। अस्माद् धनलोभाद् न्यायाधीशः हुकम सिंहं निर्दोषमेव सिद्ध- कुर्वन् अकथयत् -"हुकम सिंहः संतोषस्य हत्यां न कृतवान् , तस्य विपरीते न कोऽपि प्रमाणं विद्यते।

अभियोगे क्षमा भूते सति हुकमसिंहस्य धैर्यं पूर्वतः अधिकतम् अवर्धत् स सर्वं किमपि न जानाति यतः हत्या अभियोगे क्षमा न सुकरं कार्यं विद्यते। इदानीं स प्रीतिं बलपूर्वकमुत्थाय प्राप्तुं वाञ्छति स्म यस्मिन् दिवसे सः अभियोगे सफलतां प्राप्तवान् , तस्मिन् दिने एव प्रीतिमकथयत्-'बुलबले ! अधुना मम भव। संतोषं हत्वा क्षमां प्राप्ता यदि तव प्रेम्णि शक्तिः आसीत, तर्हि मां कारागारे किं न अक्षिपः।' 'पुरुषायुष - पर्यन्तं कारागारे

क्षेप्स्यामि. प्रणय- बलं त्वया न दर्शितम्। आयु-पर्यन्तं कारागारं भविष्यति, मे वचनानि कारागारे एव स्मरिष्यसि। अहमुच्च-न्यायालये प्रार्थनां करिष्यामि ' त्वं किम् अपि नं कर्तुं शक्नोषि। नारी अपि एव कदा सबला जाता, सा मनुष्योपरि जयं कर्तु न समर्था। तवादृशा व्रिचतुः संख्यकाः वाक्कील - पदवीं यदि प्राप्येयु· तर्हि अन्येषां वाक्कीलानां तु अवकाशो भवेत्'। 'स्वमार्गे' गच्छ, अन्यथा चपेटं खादयिष्यसि, प्रीतिः अवदत्। तस्या रक्तिमे नेत्रे दृष्ट्वा स तस्मात् स्थानात् जगाम।

प्रीतिः गृहे आगत्य, स्व वाक्कोलेन सह संलाप कृतवती। सोऽवदत्-"प्रीते ! अभियोगे असफलता, मम हृदयं दुःखी कृतवती। प्रमाणानि आवयोः पार्श्वे आसन् परं न्यायाधीशेन कथमेव कृतम्, इति न जाने। स केन प्रकारेण क्षमा दत्तवान्।' "उत्कोचेन', प्रातिः अवदत्'। 'आम् एषा वार्ता वर्तते। परम धुना किं कुर्याव। प्रार्थनां कर्तुं शक्नुवः सा उच्चन्यायालये अन्यायं प्रति प्रार्थनां कृतवती अभियोगमपि स्वहस्तयोः गृहीतवती।

यदा हुकम सिहं ज्ञानमभवत् तदा तस्य चेतः अकम्पत्। सोऽचिन्तयत् -"अधुना किं भविष्यति ?"

परं न चिन्तायाः विषयमेतत्, यतः पूर्वं 25000 रुप्यकाणि उत्कोचरुपेण दत्तानि, सम्प्रति 50000 रुप्यकाणि दास्यामि। पणकेभ्यः सकल-कार्याणि सिद्धयन्ति, पणकानि दर्शयत,

प्रीतिः

प्रत्येकं स्ववशे कुरुत । प्रीतिमवश्यमेव मिलिष्यामि । पुनः कदा मिलेत् , अधुना एव गच्छामि । सा अस्मिन् समये न्यायालये एव भविष्यति स्व कार्यालये । तत्र गत्वा एव पृच्छामि स स्व तैलद्विचक्रिकाम् असंचालयत् प्रीतेः समीपे च अगच्छत् ।

प्रीतिः तं दृष्ट्वा ध्यानं न दत्तवती परं निर्बन्धशीलः सोऽवदत् - "अहं त्वया सह वार्तां कर्तुमिच्छामि ।" प्रीतिः प्रत्यवदत् - "वद, अधुना कस्य हत्या कर्तुमिच्छसि, मे हत्या ?" 'नहि, प्रीते ! एतावती वार्ता वर्तते, यत् इममभियोगं त्यज, किमर्थं जीवनं विनाशयसि ? न किमपि भविष्यति ? रुप्यकाणि व्यर्थमेव कूपे पातयिष्यति'। तया क्रोधेनोक्तम् - "रे दुष्ट । मम जीवनं तु त्वया विनाशितम् , अधुना स्व जीवनस्य सुरक्षां कुरु । एतस्मै अभियोगाय स्व प्राणान् अपि त्यक्ष्यामि परं तव नग्नतां नग्नां करिष्यामि इतः अपसर ।"

हुकम सिंहोऽपसरत् । तस्य चेतसि क्रोधम् अग्निरिव प्राज्ज्वलत् स तस्या हत्यां एव कर्तुं मनसि निश्चयं चकार, तस्याः गृहम् अग्निसात् कर्तुं योजना निर्मिता । एकदा स्व-मित्रै सह तामुत्थापयितुं प्रयत्नः कृतवान् परं तस्मिन् दिवसे प्रीतिः गृहे नासीत् । भाटक-चाण्डाला यदा तां न अपश्यन् तदा संतोषस्य पितरं प्रति गताः । परं स वृद्धः सुरापान - अन्धान् ईदृशम् पाठमपाठयत् , यत् ते पलायिताः । संतोषस्य शिशु लवः तेषु एकस्य कन्दुकेन अक्षि अत्रोटयत् ।

प्रीतिः

यदा प्रीतिः गृहं प्राप्तवती तदा एव एतां कुघटनां श्रुत्वा दुःखिताऽभवत्। तदैव स्व पितरं विद्युत् - संदेशेन आकारयत्। विद्युत्-सन्देशं दत्वा यदा सा आगच्छति स्म तदा फूल-चित्रालयस्य समीपे, तस्या धर्मभ्रात्रा सोहनसिंहेन सह मेलनमभवत्। प्रीतिं दृष्ट्वा सः प्रसन्नोऽभवत्। प्रीतिः अवदत् - "अत्र किं करोषि ?" 'किमपि न ? कार्यवशमेव आगतोऽस्मि अन्यथा ... ..., 'तव स्वभावं जानामि।' 'आम्, जीविका-विषये अत्र आगच्छम्, परं प्रतीयते न प्राप्स्यामि।' 'जीविकां तु अहं दातुं शक्नोमि।' 'बाढम्, विलम्बं मा कुरु।' 'विलम्बं न, गृहं प्रति चल, श्वः कार्यं कर्तुमागच्छ' 'पर जीविका का ?' 'मया सह सहायकस्य कार्यं करिष्यसि ?' 'उचितमेव ! स्वीकरोमि।'

सोहन सिंहोऽतीव प्रसन्न आसीत्। मार्गे स स्वमनसि चिन्तयति स्म यत् यया सह अहं हुकम सिंहस्य कथनेन दुर्व्यवहारमकरवम्, तस्मिन् समये मामक्षमत्, धर्मभ्राता - रुपेण स्वीकारमकरोत्। अधुना तु जीविका अपि अयच्छत्। प्रीते ! भवती धन्या, मम कृते तु देवी' -सहसा तस्य बिचारावलीं त्रिचक्रिकाया घर्घरध्वनिः भङ्गामकरोत्।

गृहं गत्वा, सोहन सिंहः संतोषस्य विषये अपृच्छत्। स्मरण-चिन्हानि पुनः दृष्टिपथे आगतानि। सा किमपि कथयितुं न अशक्नोत्। नेत्रे अश्रुभिः परिपूर्णे जाते। सा सर्वां कथां रुद्धकण्ठेन कथितवती, संश्रुत्य, सोहनोऽवदत्-'भगिनि, श्यालकम्-

अग्निसात् करिष्यामि, स्व भगिन्याः सौभाग्यस्य प्रतिकारं करिष्यामि, तस्य शरीरस्य खण्डानि कृत्वा तस्य गृहस्याग्रे क्षेप्स्यामि सत्वरं वद, स कुत्र वर्तते ? अधुना एव गत्वा अस्मात्-संसारात् तस्य खादनं जलं च समापनं करोमि ।' 'नहि संतोष ! तव भगिनीपतिः मृत्यु-काले कथयमास यत् न्यायस्येव आश्रयं नीत्वा प्रतिकारं कुरु ।' 'नहि । न्यायः, न्यायः तु अन्धो भवति ।'

'नहि सोहन ! क्रोधं मा कुरु। ईश्वरः शुभं करिष्यति । यथा तवेच्छा त्वं गृहाय पत्रमलिखः यत् मया जीविका प्राप्ता मासिक वेतनं 300 रुप्यकाणि भोजनं च जलं च स्वामिनः । तदैव सोहन सिंहोऽहसत् ।

सोहन सिंहं दृष्ट्वा संतोषस्य पिताऽवदत्-"पुत्रि ! एषः बालकः कोऽस्ति, त्वया सह किं सम्बन्धो वर्तते ?" प्रीतिः प्रत्यवदत्-"जनक ! संतोषस्य सखा मम च धर्मभ्राता अस्ति । अधुना अत्रैव मया सह कार्यं करिष्यति " तदैव सोहन सिंहोऽपि तत्रागतः । सः संतोषस्य पितरमनमत् । ते वार्तासु संलग्ना अभवन् । सोहन-सिंहेन सह वार्तां कृत्वा गजन सिंहः प्रसन्नोऽभवत् ।

सोहन सिंहोऽपि प्रसन्न आसीत् । सोऽवदत्- "जनक ! भवता सह संतोषस्य वार्तां कृत्वा मम अर्ध-क्लेशं दूरं जातम् । मनः करोति, सदैव तस्य वार्ता एव कुर्याम सत्यं वदसि स मम कृते तु 'श्रवण' आसीत् । अधुना प्रीतिः मम कृते 'संतोष सिंह' एव विद्यते ।

यदा प्रीतिः मम अवलम्बः न भवेत् तर्हि ममदशा ... ...,
इति कथयित्वा तस्य नेत्रे अश्रुभिः परिपूर्णे जाते ।

वार्तासु एव रात्रिर्जाता । प्रीतिः शीघ्रमेव भोजनमपचत् । भोजनं खादित्वा सर्वे संतोषस्य स्वप्नेषु एव रताः जाताः ।

१३

हुकर्मसिंहः स्वमित्राणामसफलतां दृष्ट्वा व्याकुलो ऽभवत्। सोऽचिन्तयत् -"सा मां सुखेन जीवितुं न दास्यति। मम प्रत्येकं प्रयासः सफलो न भवति। अधुना तु मम पार्श्वे एतदेव साधनं वर्तते, तच्च अस्ति, 'न्यायाधीशं स्व पक्षे करणम्।'' स न्यायाधीशेन सह साक्षात्कारं कर्तुं विचारयमास।

अंशावतार इव न्यायस्य, विनीतः, अति नदीष्णो न्यायमूर्तिः न्यायाधीशो दर्शन सिंह "गिलः" स्व विश्रामालये उपविशन् स्वकार्ये मग्न आसीत्, चायपानमपि करोति स्म। द्वारे ध्वनिः जातः, द्वारमुद्घाटयत्, अपरिचितं स्व द्वारे दृष्ट्वा आभ्यन्तरे आनयत्। वेत्रासने उपविष्टे सति हुकर्मसिंहेनोक्तम् - "श्रीमन्। अहं हुकर्मसिंहोऽस्मि। मम हत्या — अभियोगं भवतः न्यायालये वर्तते। पूर्वमहं क्षमां प्राप्तवान्। अधुना प्रीतिः भवतः समीपे प्रार्थनां कृतवती।" आम्, प्रार्थना स्वीकृताऽभवत्। श्वः पत्ररुपेण सूचयिष्यामि, परं भवान् किम् इच्छति 'अहम् इच्छामि यत् प्रार्थनां स्वीकारं मा कुर्यात्?' 'इत्थं न भविष्यति? न किमपि कर्तुं शक्नोमि?'

श्रीमन्, न्यायधीश! सर्वं कर्तुं शक्नोति, इति कथयित्वा स 50000 रुप्यकाणि तस्य फलके अक्षिपत्। न्यायमूर्तिः न्यायधीशो दर्शन सिंहः गिलः तानि रुप्यकाणि दृष्ट्वा

प्रीतिः

रोषे आगत्य अवदत् - "हुकम सिंह ! अहं भवतः सत्कारं करोमि यतो भवान् गृहे अभ्यागत - रुपेण आगतः । उत्कोचलोभाद्, त्वं मम आत्मानं कलंकितं कृतवान् । अहं स्वीकारं न करिष्यामि मम गृहात् अपसर ।"

नहि, श्रीमन् , शान्त - मनसा चिन्तयतु, कस्मिश्चिद् दिने इदं धनं कार्यं करिष्यति ।' 'इदं धनं न किञ्चिदपि, मम पार्श्वे सर्वं वर्तते । मम पार्श्वे ईश्वरस्य दत्तं सर्वमस्ति ।" "तच्च वर्तते... ... ...' 'आम् , संतोषस्य हत्यायाः अभियोगं भवतः पार्श्वे वर्तते ।" किं त्वं चेतनावस्थायामसि न वा ? अहं संतोषसिंहस्य वार्तां न करोमि संयमस्य वार्तां करोमि । अहं संयमी अस्मि । सदैव न्यायं वाञ्छामि ।" साधु, भवतः इच्छा । अधुना तु गच्छामि परं भवतः न्यायमपि द्रक्ष्यामि, इति कथयित्वा स शीघ्रमेव बहिर् अगच्छत् ।

स्व मित्राणां पार्श्वे गत्वा, स न्यायाधीशेन सह जातां सर्वां वार्तां कथितवान् परं ते अवदन्- "अधुना वयं तव सहायतां न करिष्यामः । त्वं तु कारागारे यास्यसि, अस्मान् अपि क्षेप्स्यसि ।" हुकम सिंहः दन्तैः दन्तान् निष्पीडयन् अगच्छत् ।

विनीतो न्यायाधीशः 'गिलः' प्रार्थनां स्वीकृत्य वादानुवादस्य तिथिं दत्तवान् । अन्ततः, एषः तिथिरागतः । प्रीतिः अभियोगस्य प्रत्येक - पक्षं सुनिरीक्षितवती । यतः सा, स्व प्राणप्रियस्य इच्छां पूर्णं कर्तुमिच्छति स्म ।

प्रीतिः

यदा सा न्यायालये प्राप्ता तदा हुकम सिंहस्य वाक्कीलः, अभियोगस्य अन्वेषणाय अन्यं तिथिम् अयाचत् । न्यायाधीशेन पञ्चदश-दिनानि यावत् तिथिः निश्चितः। न्यायाधीशस्य पार्श्वे गत्वा प्रीतिः अवदत्-"न्यायाधीश ! भवता श्रेष्ठं न कृतम् ।" 'श्रेष्ठमेव कृतं श्रीमति, यदि भवती अपि समयं नेतुमिच्छां प्रकटयति तर्हि किमहं न अददम् ?"

हुकमसिंहाय पंचदश - दिनानि कथं मिलितानि स न्यायाधीशस्यापि भर्त्सनां कर्तुं समारभत् , परं न्यायधीशः तस्याग्रे न अनमत् । न केवलं न्यायाधीशम् प्रत्युत प्रीतिं प्राप्तये अपि स्व प्रयासं नात्यजत् ।

एकदा आपणे तया सह तस्या धर्मभ्रातरं सोहन सिंहं दृष्ट्वा स धैर्यहीनो विवर्णमुखश्च अभवत् यतः स सोहन सिंहस्य बलं मुष्टि - प्रहारमपि जानाति स्म। तस्य समीपे कोऽपि मार्गो न आसीत्। तस्य जनकेन बघेलसिंहेनापि स्व प्रयत्नानि कृतानि परं व्यर्थमेव जातानि । न्यायाधीशस्य सम्बन्धिनोऽपि आगत्य हुकमसिंहस्य गुणकीर्तनं चक्रुः परं न्यायमूर्ति-न्यायधीशः प्रत्युवाच-"मम आत्मा कदापि अन्यायं न करिष्यति । भवन्तो मह्यं कुप्यन्तु, अहं तु न्यायमेव करिष्यामि, कस्यापि पक्षे स्यात्। यस्मिन् पक्षे न्याय-तुला भारेण नंस्यति तस्मिन् पक्षे अहमपि नंस्यामि।"

अनेन प्रकारेण हुकमसिंहस्य तस्य पितुः च कृताः प्रयासाः न्यायाधीशं स्व पक्षे कर्तुं समर्था न अभवन्। तस्य पिता हुकमसिंहाय क्रुध्यति स्म यत् त्वं एव विनाशस्य मूलमसि। सत्यमुक्तम् - "माता शत्रुः पिता वैरी येन बालः लालितः।" अतः अहं दोषी अस्मि, न तव दोषम्। एवं विचार-सागरे निमज्जति स्म। अधुना तु तस्य समक्षे 'कारागृहम्' परिभ्रमति स्म, न्यायाधीशेन दत्त समयं च प्रतीक्षते स्म।

१४

अधुना प्रीतिं पूर्णं विश्वासासीत् यत् तामश्यमेव न्यायं मिलिष्यति । सा ज्ञातवती यत् हुकमसिंहस्य कृताः प्रयासाः असफला जाताः सा चिन्तयति स्म –"स कारागृहे पतिष्यति, इति मम आत्मा कथयति । तत् दिवसो मम कृते सुदिवसो भविष्यति । अहं तस्यैव दिवसस्य प्रतीक्षां करोमि यत् कदा मम प्राणप्रियेण दत्तं वचनं पूर्णं भविष्यति ।" तस्य चिन्तामाला तेन लवेन त्रोटिता यदा स आगत्य अकथयत्-"मम्मे ! बुभुक्षितोऽस्मि ।"

मार्चमासस्य एकत्रिंशत्तारिकाया बुधवासरः आसीत् । प्रभाते शीघ्रमेव उत्थाय, प्रीतिः स्वाभियोगस्य पत्राणि एकत्री कृत्य समयानुसारं न्यायालये प्राप्तवती । हुकमसिंहोऽपि स्व मित्रैः सह तत्र आगच्छत् तस्य मित्राणां पार्श्वे कृपाणाः, प्रासाः, नलिकाश्च आसन् ।

सोहन सिंहः यदा तस्य मित्राणि अपश्यत् तदा अबिभेत् परं धैर्यं धारयित्वा अचिन्तयत् - "सर्वे पणकानां सहायकाः सन्ति । न किमपि कर्तुं शक्नुवन्ति हुकमसिंहोऽवश्यमेव कारागारस्य वायुं खादिष्यति । न च कोऽपि सन्देहः ?"

तदैव प्रीतेः पिता अपि स्व मित्रैः सह तत्र आगच्छत् । प्रीतिः सर्वां स्थितिं वर्णितवती, श्रुत्वा, तस्याः पिताऽपि अक्रुध्यत् ।

प्रीतिः

सोऽवदत्–"सुते ! अधुना मा भैषीः। अहं तेषां खण्डशः करिष्यामि।" 'नहि, जनक ! ते तु मूर्खाः। हुकमसिंहः कारागारे पतिष्यति। अतः न्यायस्योपरि विश्वासं कुरु न हिंसोपरि।' तदैव सोहनसिंहोऽपि तत्रागतः तान् दृष्ट्वा सोहनसिंहस्य धैर्यमपि अवर्धत।

द्वादशवादनवेलायां न्यायालयस्य दौवारिकः हुकमसिंहं आकारयत्। हुकमसिंहस्य नाम श्रुत्वा, न्यायालये लोकानां वृन्द आगतः। न जाने लोका अस्मिन् अभियोगे रुचिं कथं प्रकटयन्ति स्म। शीघ्रमेव वाक्कीलयोः मध्ये वादविवादोऽभवत्। प्रीतिं वाक्कील-रूपे दृष्ट्वा, न्यायालये उपस्थिताः सकलाः जनाः आश्चर्य-चकिता अभवन्। सा हुकमसिंहस्य वाक्कीलस्य प्रश्नान् अनेन प्रकारेण कर्त्तयति स्म यथा कोऽपि कृपाणेन संदानं कर्त्तयति। तस्य वाक्कीलस्य न कोऽपि यत्नः सफलो जातः, असफलतायाः मुखमेव पश्यति स्म। स निरुत्तरो जातः। जनाः साधु, साधु, इति कुर्वन्तः प्रीतेः प्रशंसां कुर्वन्ति स्म।

हुकमसिंहस्य वाक्कीलः प्रीतेः समक्षे मौनमभवत्। प्रीतया स्व पक्षम् उपन्यसितवती। अकस्मादेव मुख्य-राजपुरुष आगत्य, संतोषेण मृत्यु-समये कथितानि वचनानि कथयमास यत् सर्वमेव हुकमसिंहेन कृतम्।

मुख्यराजपुरुषस्य साक्ष्यं श्रुत्वा हुकमसिंहः तं प्रति क्रुधे नेत्रे निचखान, यतः तेन मुख्यराजपुरुषमपि स्व पक्षे कर्तुं प्रयासः कृत आसीत् तथा च स्व पक्षे कर्तुं सफलोऽपि जातः परञ्च, दिष्ट्या,

प्रीतिः

न्यायालस्य दोषमञ्चे तस्य आत्मा अपि अकम्पत् स सत्यमेव अवदत् । सम्प्रति हुकमसिंहः मनसि एव विषं पिषति स्म ।

अन्ते न्यायाधीशः, हुकमसिंहस्य वाक्कीलाय किञ्चिद् समयं प्रायच्छत् यत् यदि स किमपि प्रष्टुम् इच्छति तर्हि मम निर्णय-पूर्वमेव पृच्छतु परं सः मौनमेवासीत् । हुकमसिंहो दोषमञ्चे तिष्ठन् क्रोधेन स्व वाक्कीलं प्रति पश्यति स्म ।

सा घटिका अपि आगता यस्याः सकला जनाः प्रतीक्षां कुर्वन्ति स्म । न्यायाधीशस्य ध्वनिना न्यायालये मौनं जातम् । न्यायधीशो निर्णयं कुर्वन् अकथयत् - "साक्षिणः वचनानि प्रमाणानि च मुख्य -राजपुरुषेण संतोषस्य मृत्यु - समये गृहतानि वचनानि, श्रुत्वा न्यायालयः एनं परिणामं प्राप्तः, यत् सतोषस्य हत्या हुकमसिंहेन कृता । अतो न्यायालयः हुकमसिंहम् आयु - पर्यन्तं कारागारं दण्डयति ।

न्यायं श्रुत्वा न्यायालये हर्षस्य वातावरणो जातः परं हुकमसिंहो विच्छादाननो जातः राजपुरुषाः तं गृहीत्वा कारागारे अनयन् ।

सर्वे जनाः प्रीत्ये साधुवादं वदन्ति स्म । साऽपि अति प्रसन्ना आसीत् । हुकमसिंहस्य पिता तस्य सहायकाः च निराशा भूत्वा प्रत्यगच्छन् । सोहनसिंहोऽपि तेषां मुखानि दृष्ट्वा अहसत् अचिन्तयत् च-"दुष्कर्मणः फलमवश्यं मिलति, तत् च अमिलत् ।

प्रीतिः

तदैव प्रीतिः आगच्छत्। तस्य विचारावली भङ्गा। प्रीतिः तं किमपि लिखितुं कथयित्वा गृहं प्रति गन्तुं प्रवृत्ता।

प्रीतिः यदा गृहं समागता तदा तस्याः लवः पूर्वमेव हर्षमनुभवन् प्रतीक्षां करोति स्म। स प्रीत्या क्रोडे उपविश्य अवदत् – 'मम्मे। अहं स्व कक्षायां 'प्रथम' आगतोऽस्मि। पश्य एतत् पदकम् , खादितुम् मिष्टान्न् - पत्रपेटकम् च।

प्रीतेः हर्षस्य न कोऽपि सीमा आसीत्। सा आह – "पुत्र। सत्यं यदि, त्व 'प्रथम' आगतोऽसि र्तहि अहमपि निज अभियोगे 'प्रथमा' समागता अस्मि अहं जानामि त्वं ममेच्छां पूर्णं करिष्यसि। स्व परिवारस्य नाम प्रकाशयिष्यति। लवोऽपि स्व मातुर्व्वचनानि श्रुत्वा अतितरं प्रसन्नाऽभवत् यदा प्रीति. तमुत्थाय तस्य चुम्बनं कर्तुं प्रवृता तदा सहसा एव तस्याः दृष्टिः सतोषस्य चित्रे अपतत् चित्रं दृष्ट्वा 'स्व लवम्' अंके गृहीत्वा निज - भूत पूर्वं जीवने ... ... ।



(समाप्तः)

शुद्धि-पत्रम्

नं:	अशुद्धम्	शुद्धम्		पृ०
1	प्रार्तुं	प्राप्तुं	—	9
2	द्रर्ष्टुं	द्रष्टुं	—	9
3	आशीर्वादे:	आशीर्वादैः	—	12
4	अस्थ	अस्य	—	12
5	लब्धस्वर्णपदक	लब्धस्वर्णपदक:	—	12
6	पाणिनेस्तु	पाणिनिस्तु	—	16
7	द्धितीया	द्वितोया	—	16
8	संलग्ना	संलग्नानि	—	19
9	केवल	केवलं	—	21
10	कारणग्	कारणम्	—	22
11	अपृच्छत	अपृच्छत्	—	22
12	विद्यायम्	विद्यालयम्	—	22
13	मच्छति	गच्छति	—	22
14	स्वार्णिम	स्वर्णिम:	—	23
15	उदधोषयन्ति	उद्‌धोषयन्ति	—	23
16	वार्ता	वार्ताम्	—	24
17	अकम्पत	अकम्पत्	—	25
18	मुख	मुखम्	—	27
19	विकसित	विकसितं	—	27
20	परिवतितम्	परिवर्तितम्	—	27
21	प्रयाप्त:	प्रर्याप्तः	—	28
22	कतुं	कर्तुं	—	29
23	नृशंसा	नृशंसा:	—	30

प्रीति:

नंः	अशुद्धम्	शुद्धम्		पृ०
24	अस्मांक	अस्माकं	—	30
25	संताषं	सन्तोषम्	—	32
26	तस्यः	तस्याः	—	32
27	संताषः	सन्तोषः	—	33
28	कृतवृती	कृतवती	—	34
29	स्नेह	स्नेहं	—	34
30	खडगधारायाः	खड्गधारायाः	—	35
31	चिन्तया	चिन्ताया	—	36
32	श्रातुम्	श्रोतुम्	—	38
33	मह्य	मह्यं	—	41
34	प्ररेणा	प्रेरणा	—	41
35	अकथयंत्	अकथयत्	—	42
36	रामपुराफल	रामपुराफूल	—	42
37	मोटरयानलये	मोटरयानालये	—	44
38	प्रध्यापकाश्च	प्राध्यापकाश्च	—	44
39	देशायं	देशाय	—	44
40	दत्त्व	दत्त्वा	—	45
41	उत्पेक्षणं	उत्क्षेपणस्य	—	45
42	आमम्	आसम्	—	45
43	प्राणप्रियां	प्राणप्रिया	—	47
44	पाशंयितुमिच्छामि	पाशयितुमिच्छामि	—	50
45	बालिकाभ्य	बालिकाभ्यः	—	52
46	प्रेषयत्ः	प्रेषयत्	—	52
47	अवदत	अवदत्	—	54
48	यत	यत्	—	54
49	शान्ति	शान्तिः	—	55

नं:	अशुद्धम्	शुद्धम्		पृ०
50	शकनोमि	शक्नोमि	—	56
51	बाढम	बाढम्	—	63
52	आरुह्यय	आरुह्य	—	64
53	स्यन्दनं:	स्यन्दन:	—	65
54	संस्थाया	संस्थाया:	—	65
55	अजीविकाया	आजीविकाया:	—	65
56	इदानामपि	इदानीमपि	—	65
57	कर्तुं मिच्छति	कर्तुमिच्छति	—	66
58	आह्लादस्य	आह्लादस्य	—	66
59	त्व	त्वं	—	67
60	श्रृत्वा	श्रुत्वा	—	67
61	बहिर	बहिर्	—	73
62	प्रात्या	प्रीत्या	—	75
63	चूर्णयित्वा	चूर्णयित्वा	—	75
64	अभ्यन्तरे	आभ्यन्तरे	—	78
65	आस्तित्वम	आस्तित्वम्	—	78
66	विद्युद	विद्युद्	—	78
67	संतोषोऽवदत	सन्तोषोऽवदत्	—	78
68	अक्षिपत	अक्षिपत्	—	79
69	यत	यत्	—	79
70	विद्युत	विद्युत्	—	79
71	कमपि	किमपि	—	80
72	प्रत्यागच्छत	प्रत्यागच्छत्	—	81
73	सामुख्य	सामुख्यं	—	81
74	श्रष्ठं	श्रेष्ठं	—	86
75	जगाम्	जगाम	—	87

नंः	अशुद्धम्	शुद्धम्		पृ०
76	अधुनाः	अधुना	—	87
77	कमपि	किमपि	—	88
78	क्रतवती	कृतवती	—	88
78	अवर्धत्	अवर्धत	—	90
79	आसीत	आसीत्	—	90
80	नं	न	—	91
81	मित्रै	मित्रैः	—	92
82	निश्चितः	निश्चिता	—	98
83	विश्वासासीत्	विश्वासमासीत्	—	100
84	हुकमसिहोऽपि	हुकमसिंहोऽपि	—	100
85	प्रोत्या	प्रीतिः	—	101
86	अकम्पत्	अकम्पत	—	102
87	विच्छादानो	विच्शादाननो	—	102
88	मातुर्व्वचनानि	मातुर्वचनानि	—	103
89	प्रसन्नाऽभवत्	प्रसन्नोऽभवत्	—	103